S. V. U. O. Journal Vol. XVIII - Texts and Studies - Off Print No. 5

*General Editor:* **Prof. S. SANKARANARAYANAN,** M.A., Ph.D.,
*Director, S.V.U.O.R.I.*

नारदमुनिप्रणीता

# गजशिक्षा

उमापत्याचार्यविरचितव्यक्तिनामकटिप्पणीसहिता

# GAJAŚIKṢĀ

*by*

NĀRADAMUNI

With the Commentary *Vyakti* of Umāpatyācārya
Edited with Introduction

*by*

**Prof. E.R. SREEKRISHNA SARMA,** M.A., Ph.D.,
*Professor and Head of the Department of Sanskrit*
*S. V. University, Tirupati*

**PUBLISHED BY**
SRI VENKATESWARA UNIVERSITY
ORIENTAL RESEARCH INSTITUTE

TIRUPATI

**S. V. U. O. Journal Vol. XVIII – Texts and Studies – Off Print No. 5**

*General Editor:* **Prof. S. SANKARANARAYANAN,** M.A., Ph.D.,
*Director, S.V.U.O.R.I.*

नारदमुनिप्रणीता

# गजशिक्षा

उमापत्याचार्यविरचितव्यक्तिनामकटिप्पणीसहिता

# GAJAŚIKṢĀ

*by*

NĀRADAMUNI

With the Commentary *Vyakti* of Umāpatyācārya
Edited with Introduction

*by*

**Prof. E.R. SREEKRISHNA SARMA,** M.A., Ph.D.,
*Professor and Head of the Department of Sanskrit*
*S V. University, Tirupati*

**PUBLISHED BY**
SRI VENKATESWARA UNIVERSITY
**ORIENTAL RESEARCH INSTITUTE**

**TIRUPATI**

**1975**

*Printed at :*

S.V.U. PRESS, TIRUPATI

# PREFACE

Elephant is the most powerful member of the animal kingdom and hence it has always attracted the attention of mankind, particularly the Indians, since the dawn of history. According to the ancient Indian thought, the elephant is one of the important constituants (*aṅgas*) of the army and the strength of an army and its success in an expedition, depend on the number of the brave, mighty and well-equipped elephants led by the able *mahouts*. The great epic *Mahābhārata* gives pictures how different heroes riding on elephants fought heroically in the Kurukṣetra war. The epigraphical records also bear witness to the fact how different kings won several battles by the intelligent use of their elephant-force and how many have lost their battles by the unintelligent use of the same. For example, by using the elephant force indiscriminately, the Viṣṇukuṇḍi king Indrabhaṭṭārakavarman of the South (*c*. 527–55 A.D ) lost his battle against the Maukhari Īśānavarman of the North (*c* 550–76 A.D ) and the great Puṣyabhūti emperor Harṣavardhana too of the North (606–46 A.D.) lost a war against the Cālukya Pulakeśi II (610–42 A.D.) of the South. On the other hand by using the elephant army intelligently Pulakeśi II won many a battle, especially in his Andhra campaigns. The elephant warfare seems to have been well developed in the South, particularly in Andhra, since the sixth century A.D. During this period many monarchs styled themselves, as having won spectacular victories in the fierce battles of four-tusked elephants. Here, we hear the classification of the elephants under the names Supratīka, Kumuda etc. The Western Gaṅga king Bhūvikrama (*c*. 635–79 A.D.) assumed the title *Gajapati* (Lord of Elephants) and the same was the dynastic appelation of the Sūryavaṃśi dynasty of Orissa founded by Capilendra Gajapati in 1435 A.D The Coḷa king Rājādhirāja I (1018–54 A.D.) is described to have died on the back of an elephant in a pitched battle at Koppam against the Kalyāni Cālkuya king Someśvara I (1042-68 A.D.). Examples of similar nature can be multiplied. Besides, the elephants have been always looked upon as an inevitable royal insignia in India. Moreover, they have been used, as beasts of burden too down the ages.

In view of all, it is but natural that books have been written on elephants. A few among such works that are well-known in the field may be mentioned here. The *Arthaśāstra* of Kauṭilya (*c*. 4th century B.C.) speaks of the *Hastivana* and the *Nāgavana* (Royal elephant-sanctuaries) and stipulates how the elephants are to be looked after. An Asokan edict too speaks of the Nāgavana. *Gajāyurveda* has been

considered to be a special branch of Indian veterinary science. The famous *Bṛhatsaṃhitā* by Varāhamihira of the Gupta age allots one small chapter to the *Hastilakṣanas* (characteristic marks of different tpyes of elephants). The Western Gaṅga king Durvinīta (8th century A.D.) is at times credited with a work on the *Gajaśāstra*. The encyclopedic work *Abhilaṣitārthacintāmaṇi*, attributed to the Kalyāṇi Cālukya king Someśvara III (1126-38 A.D) enumerates the different forests having elephants, and describes the methods of catching and training them. In the *Hariharacaturaṅgam* of Godāvara Miśra, a court poet of Pratāparudra Gajapati (1497-1541 A.D.), the very first chapter, consisting of as many as 313 verses, is devoted entirely to the various aspects of the elephant science. The *Śivatattvaratnākara* attributed to the Keladi chief Basava or Basappa Nāyaka (1694-1714 A.D) of the Kannaḍa country, describes at length, various types of the elephants.

In 1968, the Sri Venkateswara University Oriental Researeh Institute, Tirupati, brought out a book entitled *Gajagrahaṇaprakāra* as the Institute's *Text and Study Series No. 1* in its Journal, Volume VII. Now, I am happy to introduce to the world of scholars another book of similar nature bearing the title *Gajaśikṣā*. It is composed in the form of the teaching imparted to Indra-Vāsava by Nārada, the sage famous in Indian mythology. The work has a brief commentary written by one Umāpatyācārya. The book is included in the S.V.U. Oriental Journal, Volume XVIII, for the year 1975, as the Institute's *Text and Study Series, No.* 5. Both the above mentioned *Gajagrahaṇaprakāra* and the present work viz., *Gajaśikṣā*, unlike other works mentioned above, mainly deal with the catching of the elephants by *kheddah* and with training them. Both these works have been ably edited by Dr. E.R. Sreekrishna Sarma, who is the Professor and Head of the Department of Sanskrit, S.V. University and who is well known to the world of scholars both in India and abroad I am extremely thankful to him for this pains-taking work of this kind in the midst of his multifarious engagements.

Thus now we have sufficient material for a critical study of the elephant lore in ancient India. And in this respect the present work may be of immense value.

I am beholden to the Vice-Chancellor and the Registrar of the Sri Venkateswara University for their generous grant for the publication of the present book and I express my gratitude to the Director of Publication, Sri Venkateswara University and the Press Manager, S.V University Press, for printing the same.

TIRUPATI,
*1st March, 1979.* *S. SANKARANARAYANAN*

# INTRODUCTION

In 1968, *Gajagrahaṇaprakāra*, a metrical work dealing with the catching and training of elephants edited by me, appeared in this Series. Now this work called *Nāradīyagajaśikṣā*, almost of the same nature as the previous one is placed in the hands of the scholars. While the former one was mainly dealing with the methods of catching the elephants, the present one, as it is obvious from the title, is intended to serve the main purpose of describing the methods of training the elephants. But unfortunately this main objective is not fulfilled as the work breaks off in the middle.

I took up the editing of this work on the following considerations:

1. There is only one manuscript of the work known to us and this is in the S.V.U.O.R. Institute, Tirupati. So this Institute has an obligation to bring out this work which is not available elsewhere.

2. Several treatises in Sanskrit on technical subjects deserve to be brought to light, irrespective of their being very significant or otherwise.

3. There may be a new point of information in this work which is not available in the known works on elephant lore.

Like the *Gajagrahaṇaprakāra*, this work is also edited from a single transcript, the source of which is unknown. The codex bears the stock No. 6709 of the Institute. The material is modern ruled paper (20 cm. by 16.5 cm.) and the script is *Grantha*. It contains 76 folios written on both sides and 20 lines per page. Neither the date of transcription nor the date of acquisition of this manuscript is recorded.

Unlike the *Gajagrahaṇaprakāra*, which is in the *Āryā* metre, this work is in *Anuṣṭup* verses. It has a commentary called *Vyaktiṭippaṇī* by one Umāpatyācārya. Really there is no need for a commentary as the work is written in an easy Puranic style. But the commentary summarises the contents of each chapter in a readable prose. The commentary is also printed here and appended to the original metrical work, as it was thought that nothing should be allowed to remain in the manuscript form when the text is printed.

The work is divided into *paṭalas*. The first *paṭala* commences with the statment of Devala how the sage Nārada visited the court of Indra and how on the request of the latter Nārada proceeded to teach him the *Gajaśikṣā*. Thereafter the *paṭala* deals with the mythological origin

of elephants. They are created by the Creator by singing the *Sāmaveda*. Originally they had wings and used to bring unexpected damages to the world. Hence, the God made them incapable of moving in the air and thus they became the largest, intelligent and beautiful animals, called elephants, on the land.

The second chapter enumerates and describes the characteristics of twenty-eight varieties of elephants found on earth. Among them the sixteen varieties are called noble *(uttama)* ones, as they are born with the characteristics of gods, semi-gods and human beings. Their height, colour, the places where they are generally found and their dispositions are elaborately dealt with. They are those that bear the traits of the gods — Indra, Agni, Yama, Varuṇa, Vāyu, Kubera, Śaṅkara, Viṣṇu, Brahmā and Candra; of the semi-gods — Yakṣas, Gandharvas and Kinnaras and of the ascetics, kings and ordinary human beings. The elephants, belonging to the middle class are those having the traits of the manes, the fish, the birds, creepers, flowers and cows. The elephants having the traits of Rākṣasas, Asuras, Piśācas, lions, tigers and monkeys belong to the low class.

The third, fourth and fifth *paṭalas* deal with catching of the elephants. For this purpose, the places, of where the good varieties of them are found in India, are described in the third *paṭala,* while the fourth gives an account of the movements of the elephants and the good omens that predict an easy catch for the adventurers. The fifth describes the four methods of catching the elephants and they are all in general agreement with the contents found in the *Gajagrahaṇaprakāra* puplished earlier. The methods enumerated here are (1) *durgabandha* (catching the animals by putting barricades on their way and driving them into an enclosure); (2) *vāribandha* (blocking the escape of the elephants when they enter a lake or large pond for drinking and sporting in the water); (3) *kariṇībandha* (enticing the males by the trained females), and (4) *gartabandha* (making the animals fall in the artificially dug ditches). The sixth *paṭala* is devoted to describing the methods of bringing the elephants, caught in the forest, to the city of the king. The desirable qualities of the *mahouts* are also described here.

The subject matter dealt with in the seventh *paṭala* is the construction of abodes, where the newly caught elephants are to be housed. An elaborate description of the various kinds of sheds for the animals and the quarters for the *mahouts* finds a place here. This matter is not found in any other work so far published on elephants. The eighth *paṭala* throws light on the various traits, features and behaviour of elephants when they are in the first years of their growth and are in love.

The ninth *paṭala* first gives an account of the growth and behaviour of the elephants from their second to the tenth year. This is followed by the details of the various phases of training in their course. The training to be imparted to the elephants is divided into seven phases. The first is *prārambhaśikṣā* (initiation in training), and the second *khelanaśikṣā* (training in sports). These two trainings are to be given upto the end of the fourth year of their age. By the beginning of the fifth year, training must be given to them in running. Unfortunately the manuscript breaks off in the middle of the description of this *dhāvanaśikṣā*. We do not know what are the other four *śikṣās* contained in the work.

It is hoped that the work will be useful for those who are interested in the technical information from the past and especially in the elephant lore.

TIRUPATI

*29th February, 1979* *E.R. SREEKRISHNA SARMA*

# विषयसूचिका

## गजशिक्षा

प्रथमः पटलः .... .... .... १
द्वितीयः पटलः ... .... .... ४
तृतीयः पटलः ... .... .... ११
चतुर्थः पटलः .... .... .... १४
पञ्चमः पटलः .. ... .... १९
षष्ठः पटलः .... .... .... २५
सप्तमः पटलः .... .... .... २६
अष्टमः पटलः .... .... ... २९
नवमः पटलः .... .... .... ३१

## व्यक्तिटिप्पणी

गजसृष्टिक्रमकथनम् .... .... ४१
गजजात्यंशनिरूपणम् .... .... ४३
गजप्रयोजनगजस्थाननिरूपणम् .... .... ५४
गजबन्धनस्थाननिर्देशकथनम् .... .... ५७
गजबन्धनरचनाक्रमकथनम् .... .... ६०
गजानयनक्रमहस्तिपाललक्षणक्रमकथनम् .... .... ६५
गजशालालक्षणकथनम् .... .... ६८
गजवयःकार्यक्रमकथनम् .... .... ७०
गजशिक्षाक्रमनिरूपणम् .... .... ७२

# विषयसूचिका

## गजशिक्षा


| | |
|---|---|
| प्रथमः पटलः | १ |
| द्वितीयः पटलः | ४ |
| तृतीयः पटलः | ११ |
| चतुर्थः पटलः | १४ |
| पञ्चमः पटलः | १९ |
| षष्ठः पटलः | २५ |
| सप्तमः पटलः | २६ |
| अष्टमः पटलः | २९ |
| नवमः पटलः | ३१ |


## व्यक्तिटिप्पणी


| | |
|---|---|
| गजसृष्टिक्रमकथनम् | ४१ |
| गजजात्यंशनिरूपणम् | ४३ |
| गजप्रयोजनगजस्थाननिरूपणम् | ५४ |
| गजबन्धनस्थाननिर्देशकथनम् | ५७ |
| गजबन्धनरचनाक्रमकथनम् | ६० |
| गजानयनक्रमहस्तिपाललक्षणक्रमकथनम् | ६५ |
| गजशालालक्षणकथनम् | ६८ |
| गजवयःकार्यक्रमकथनम् | ७० |
| गजशिक्षाक्रमनिरूपणम् | ७२ |

अथ

# नारदमुनिप्रणीता

## गजशिक्षा

### प्रथमः पटलः

**देवल उवाच—**

त्रिलोकीसंचारशीलो नारदो भगवानृषिः ।
पुरा सुधर्मां संप्राप्तो महेन्द्रादिभिरर्चितः ॥ १ ॥

परमां प्रीतिमासाद्य नानासंलापकर्मणि ।
महतीं वादयन् वीणामभूदानन्दवर्धकः ॥ २ ॥

कथाश्रवणवेलायां शचीपतिररिंदमः ।
प्राञ्जलिः प्रणतो भूत्वा व्यजिज्ञपदिदं वचः ॥ ३ ॥

**वासव उवाच—**

भगवन् नारदमुने सर्वशास्त्रविशारद ।
पुण्यानां परिपाकेन तव दर्शनमत्र हि ॥ ४ ॥

धन्या एव वयं स्वर्गे नाकिनो मुनिसत्तम ।
निधिस्त्वमेव शास्त्राणां गूढार्थानामनेकशः ॥ ५ ॥

गजशिक्षाक्रमं ज्ञातुं त्वन्मुखाद् विधिनन्दन ।
वयं कौतूहलभृतः समयश्च शुभावहः ॥ ६ ॥

कथं पूर्वं गजाः सृष्टाः के ते तद्वंशजाश्च के ।
युगभेदेन तेषां तु वंशवृद्धिरभूत् कथम् ॥ ७ ॥

तेषां गुणाः कथं ज्ञेयाः कथं ग्राह्याश्च ते वने ।
कथं रक्ष्याः कथं शिक्ष्याः कीदृशं तद्बलादिकम् ॥ ८ ॥

स्वरूपगुणशीलाद्याः कीदृशाः करिणां मुने ।
एतत् सर्वं तदन्यच्च गूढार्थं च विशेषतः ॥ ९ ॥

परया कृपयास्मासु वक्तुमर्हसि सुव्रत ।
वासवेनैवमुक्तस्तु नारदस्तुष्टमानसः ॥ १० ॥

शिरःकम्पनदानेन हर्षेण च मुनीश्वरः ।
परमाभिरथाशीर्भिस्तोषयित्वा सुरोत्तमान् ॥ ११ ॥

यक्षैश्च देवैर्गन्धर्वैः स्तूयमानः समन्ततः ।
गजशिक्षां सुधर्मायां वक्तुं समुपचक्रमे ॥ १२ ॥

नारद उवाच—

हरिनाभिसरोजोत्थो विधाता चतुराननः ।
कृते गायन् सामवेदमसृजद् वारणोत्तमान् ॥ १३ ॥

जविनं बलसंपन्नं रौप्यपर्वतसन्निभम् ।
शुभलक्षणपूर्वाङ्गमैरावतमिभाधिपम् ॥ १४ ॥

अभ्रम्वा भार्यया युक्तमादौ ब्रह्मासृजत् स्वयम् ।
ततः कपिलया युक्तं पुण्डरीकं गजोत्तमम् ॥ १५ ॥

पुष्पदन्तं ताम्रकर्ण्याङ्गनया वामनं गजम् ।
ततोऽनुपमया युक्तं सुप्रतीकं द्विपोत्तमम् ॥ १६ ॥

अञ्जनासहितं शूरमञ्जनं नागवल्लभम् ।
शुभ्रदन्तीसनाथं च सार्वभौममिभप्रभुम् ॥ १७ ॥

कुमुदं कुमुदाकारं पिङ्गलामण्डितं गजम् ।
असृजत् पद्मभूरेवं दिङ्नागानष्ट वासव ॥ १८ ॥

ते सर्वे पक्षसंपन्नाः कामरूपा महौजसः ।
स्वर्गे भूम्यां च पाताले विचेरुः स्वेप्सितक्रमात् ॥ १९ ॥

अभवन् दिग्गजक्षकाश्च मानिताः सुरनायकैः ।
पद्मोदरारिष्टमुखास्तत्पुत्राश्च ततः क्रमात् ॥ २० ॥

त्रैलोक्यसंचारलोला बभूवुर्वारणाधिपाः ।
देवदानवयुद्धेषु वाहनत्वं च भेजिरे ॥ २१ ॥

ततः कालेन महता शतशोऽथ सहस्रशः ।
तत्पुत्रपुत्रसंभूताः करिणो बलगर्विताः ॥ २२ ॥

मुनीनामुटजं प्राप्य हिंसां चक्रुरनेकधा ।
ततः क्रुद्धैर्मुनीन्द्रैस्ते शप्ताश्च बहुधा गजाः ॥ २३ ॥

गतपक्षा हीनबलाः द्विदन्ताश्चाभवन् तदा ।
भूमावङ्गादिदेशेषु विचेरुश्च कुटुम्बिनः ॥ २४ ॥

आदौ युगे तु मातङ्गाः सर्वे भद्रकुलोद्भवाः ।
त्रेतायां ते मन्दकुलाः किंचिन्न्यूनपराक्रमाः ॥ २५ ॥

द्वापरे वारणाः सर्वे मृगजातिसमुद्भवाः ।
कलौ युगे तु ते प्रायः संकीर्णकुलसंभवाः ॥ २६ ॥

तथापि देवतानां ते वरमाहात्म्यसंपदाः ।
बलिष्ठा बुद्धिमन्तश्च जविनः पर्वतोपमाः ॥ २७ ॥

नानाकार्येषु कुशलाः राष्ट्रसंपद्विवर्द्धिताः ।
नृणां वाहनतां प्राप्ता यन्तृचित्तानुवर्तिनः ।
तद्वात्सल्यनिबद्धाश्च निवसन्तीह सर्वतः ॥ २८ ॥

**इति नारदकृतगजशिक्षायां प्रथमः पटलः**

## अथ द्वितीयः पटलः

तेषूत्तमाः केचिदिभाः जायन्तेऽद्यापि भूतले ।
कुलतेजोवीर्यशक्त्या मानिता विजयप्रदाः ॥ १ ॥

मनोहरतनुस्तुङ्गो जवी पूर्णपराक्रमः ।
समरे विजयी धीमान् शुद्धो मञ्जुललोचनः ॥ २ ॥

मदकाले भृशं शूरो नीलनीरदकान्तिमान् ।
शुभाननः शुभगतिर्दीर्घशुण्डः प्रतापवान् ॥ ३ ॥

केतकच्छायरदनो निद्रालस्यादिवर्जितः ।
प्रशान्तात्मा दीर्घवयाः प्राणिवात्सल्यमण्डितः ॥ ४ ॥

नातिक्रोधः क्षमावांश्च निधिः सत्वस्य वारणः ।
महेन्द्रांश इति ख्यातो नृणां सौभाग्यवर्धकः ॥ ५ ॥

अन्ये तु वारणाः शूराः रक्तनेत्रा रणाजिरे ।
दहन्ति वह्निवच्छत्रून् क्रुधा चण्डपराक्रमाः ॥ ६ ॥

प्रायशो रक्तरोमाणो दीर्घशुण्डाः पृथूदराः ।
आरक्तदन्तयुगलाः वह्न्यंशा वारणा मताः ॥ ७ ॥

रक्तबिन्दुमुखाः केचिद् रक्तपादनखाः परे ।
रक्तकर्णाश्च ते सर्वे वह्न्यंशाः कथिता सुरैः ॥ ८ ॥

यमांशा नीलकायास्ते भीकरा मृगयादिषु ।
दीर्घदन्ता महावेगाः कोपनास्तुङ्गविग्रहाः ॥ ९ ॥

शूराः कर्मणि नित्यं च सत्कार्यनिरताशयाः ।
कोपकालेष्वसाध्याश्च धीमन्तः फलदायिनः ॥ १० ॥

जलेशांशाः केचिदिभा भवन्तीह क्षमातले ।
जलावगाहनासक्ताः सन्ततं मदवर्षिणः ॥ ११ ॥

शीतलस्थलवासैकनिरताः शान्तमानसाः ।
राजन्ते रणशूराश्च नातितुङ्गा मनोहराः ॥ १२ ॥

नृणां भाग्यप्रदास्त्वेते क्षीरवर्णरदद्वयाः ।
नाथवात्सल्यबद्धाश्च राष्ट्रक्षेमकरा भृशम् ॥ १३ ॥

अनिर्धार्यमहावेगाः शरवच्चण्डपौरुषाः ।
मृगयाकार्यरसिकाः शुद्धदेहाः सुगन्धिनः ॥ १४ ॥

शश्वत् स्वस्थानचलनाः लीलाखेलनलालसाः ।
सर्वे ते द्विरदा लोके पवमानांशभासुराः ॥ १५ ॥

वसन्तकालसन्तुष्टाः हृद्यरींकारकारिणः ।
पालिता मानुषैस्तेषां मङ्गलानन्ददायिनः ॥ १६ ॥

तं वदन्ति कुबेरांशं मुनयो वारणाधिपम् ।
यः पुण्डरीकरदनो नीलमेघसमद्युतिः ॥ १७ ॥

आचञ्चलगतिर्नित्यं कोमलाननमण्डितः ।
करिणीमार्गभागेषु दत्तनेत्रः प्रतापवान् ॥ १८ ॥

स्मृतिमान् कोपदूरश्च नाथाज्ञापरिपालकः ।
नितरां दीर्घशुण्डश्च दीर्घवालः क्षमानिधिः ।
राजते धनधान्यादिक्षेमवृद्धिप्रदायकः ॥ १९ ॥

त्रिवल्यो मुखभागेषु वक्षःस्थानेषु वा क्वचित् ।
येषां शरीरे दृश्यन्ते ते रुद्रांशाः प्रकीर्तिताः ॥ २० ॥

तुङ्गाश्च दीर्घदेहा ये तान् रुद्रांशान् विदुः सुराः ।
मृगयादिष्वप्रमत्ताः कोपकाले तु भीकराः ॥ २१ ॥

महावेगाः प्रचण्डाश्च फलसिद्धिजयप्रदाः ।
मञ्जुधूसरवर्णाक्ता ये स्वभावात् सुमेधसः ॥ २२ ॥

ये पुष्कराग्रे संमिश्रच्छायास्तांश्च मुनीश्वराः ।
अपर्णापत्यंशभाजो विदुः क्षेमप्रदान् नृणाम् ॥ २३ ॥

यक्षांशास्ते विनिर्दिष्टा ये गजाः शुभलक्षणाः ।
शुभाननाः शान्तचित्ताः सर्वप्राणिहिते रताः ॥ २४ ॥

अलङ्कृतिप्रिया नित्यं मृगयादिषु लालसाः ।
मिताहारा नित्यजलक्रीडाः सुलभशिक्षकाः ॥ २५ ॥

सुमेधसः क्रियादक्षाः नीलजीमूतसन्निभाः ।
करेणुभोगनिरताः शीतलस्थललासिनः ॥ २६ ॥

एवंलक्षणसम्पन्ना नागाः कोमलविग्रहाः ।
राष्ट्रक्षेमाभिवृद्ध्यर्थं निर्मिताः पद्मयोनिना ॥ २७ ॥

वारणास्ते तु गान्धर्वाः सङ्गीतादिषु लालसाः ।
स्वल्पालस्या हीनबलाः कोमलाङ्गाश्च ये द्विपाः ॥ २८ ॥

प्रायशो मन्दगतयः शुभदन्ताः शुभाननाः ।
नाथवात्सल्यभाजश्च सन्ततं प्रियभाषणाः ॥ २९ ॥

नातितुङ्गा न नीचाश्च मञ्जुनेत्रा मृदुत्वचः ।
नानालीलासु रसिकाः संपुष्टा माघवे दिने ॥ ३० ॥

पद्मिनस्ते किन्नरांशाः पद्मगन्धाः शुभेक्षणाः ।
प्रियापार्श्वाः शान्तचित्ता धीमन्तः प्रियभाषणाः ॥ ३१ ॥

नितरां मञ्जुगतयः स्वासना वाहनोचिताः ।
चन्द्रिकादिविहारेच्छाः शुद्धदेहाश्च ये गजाः ॥ ३२ ॥

प्रेरणात् कार्यकर्तारो नाथवात्सल्यबन्धिताः ।
ह्रस्वाङ्गाः क्षुद्रदन्ताश्च शुभदाः शुभलक्षणाः ॥ ३३ ॥

विष्ण्वंशराजितास्ते तु नित्यमङ्गलदायिनः ।
ये शङ्खचक्रादिलसत्पार्श्वाश्चण्डपराक्रमाः ॥ ३४ ॥

येषां कराग्रे तल्लक्ष्म मुखे वा परिदृश्यते ।
ते सर्वे दृढदन्ताश्च विष्ण्वंशाः परिकीर्तिताः ॥ ३५ ॥

दीर्घशुण्डं तुङ्गकायं शान्तं श्लाघ्यक्रियादरम् ।
चिरायुषं बिन्दुकर्णं बिन्द्वाननमथापि वा ॥ ३६ ॥

गजबृन्दपुरोगं च जयिनं शुभलक्षणम् ।
राष्ट्रक्षेमकरं नित्यं मानयेद् धरणीपतिः ॥ ३७ ॥

वाणीशांशसमुद्भूता वारणास्ते सुमेधसः ।
कान्तस्वराः सुशिक्षाश्च ये नाथप्रीतिवर्धकाः ॥ ३८ ॥

नातितुङ्गा नापि नीचाः शुद्धदेहाः पृथूदराः ।
आरक्तनेत्राः सततं चलच्छुण्डाः शुभप्रदाः ॥ ३९ ॥

वर्षाकाले सुपुष्टाश्च पुंसां पुण्यविधायिनः ।
सर्वक्लेशसहा नित्यं मितनिद्रा मिताशनाः ॥ ४० ॥

केचिदारक्तवक्त्राश्च रक्तदन्तास्तथापरे ।
ब्रह्मांशास्ते च लोकेषु संमान्याः क्षेमवृद्धये ॥ ४१ ॥

चन्द्रांशा वारणाः सर्वे श्वेतकाया मनोहराः ।
श्वेतबिन्द्वाननाः केचित् क्षीरदन्तनखास्तथा ॥ ४२ ॥

स्वच्छाहाररता नित्यं श्वेतरेखाननाः परे ।
शीतलाङ्गाः शान्तचित्ताः धनपुत्रादिभाग्यदाः ॥ ४३ ॥

इङ्गितज्ञा दीर्घवालाः सर्वकार्यकृतादराः ।
शुभदा यन्तृवशगाः करिणीकेलिलालसाः ॥ ४४ ॥

ते तापसांशा विज्ञेयाः सन्ततं वनवासिनः ।
एकाकिनः शान्तचित्ता मीलिताक्षाः सुखोचिताः ॥ ४५ ॥

विजितक्षुत्पिपासाद्या जितकामादयश्च ये ।
अप्रमत्ताश्च कार्येषु चण्डा युद्धे सुमेधसः ॥ ४६ ॥

त्रिकालस्नाननिरताः लघुशिक्षाक्रमादयः ।
वृक्षच्छायनिवासोत्काः स्वल्पाहाराश्च ये द्विपाः ॥ ४७ ॥

चिरस्मृतिश्च येषां ते तापसांशाः प्रकीर्तिताः ।
अदण्ड्याः जयकार्याश्च संमान्या भूमिपालकैः ॥ ४८ ॥

लोकपालांशसंभूताः सत्यसंधाश्च पार्थिवाः ।
निर्दिष्टा ये तु भूलोके तदंशा वारणोत्तमाः ॥ ४९ ॥

शुभस्वरा दीर्घदन्तास्तमालाभतनुत्विषः ।
रक्तास्या रक्तबिन्द्वाढ्यास्त्वप्रमेयबलोदयाः ॥ ५० ॥

पृथुकुम्भा दीर्घवाला नित्यालंकृतिलालसाः ।
प्राणिवात्सल्यबद्धाश्च करिणीपार्श्वगा मुहुः ॥ ५१ ॥

राजवाहनयोग्यास्ते वारणा रक्तपुष्कराः ।
मालारेखामुखाश्चापि निर्दिष्टाः पार्श्ववंशजाः ॥ ५२ ॥

उत्तमा ये नरा लोके गुणकार्यकुलादिभिः ।
निर्दिष्टाः कविना पूर्वं तदंशाश्चापि वारणाः ॥ ५३ ॥

वसन्ति नानादेशेषु कुञ्जेष्वपि च कानने ।
ह्रस्वकाया ह्रस्वदन्ता मानुषक्रीडनादराः ॥ ५४ ॥

अन्नभक्ष्यासक्तिभाजो बुद्धिमन्तः क्रियाकराः ।
खिन्नाश्चातपवेलासु शश्वच्चलितकर्णिकाः ॥ ५५ ॥

शुभलक्षणसम्पन्ना भासन्ते मानवांशकाः ।
मनुष्यहितकर्तारः सम्मान्याः प्रतिवासरम् ॥ ५६ ॥

एवं षोडशधा हस्तिकुलं प्रोक्तं महर्षिणा ।
सर्वलाभकरं पुंसां प्रतिदेशं सुरक्षितम् ॥ ५७ ॥

तत् सर्वमुत्तमं ख्यातं सेनाबलविवर्धकम् ।
षड्विधं मध्यमकुलं निश्चितं हस्तिनामिह ।
स्तम्बेरमाणां तेषां च लक्षणं शृणु वासव ॥ ५८ ॥

पितामहांशाः पित्रंशाः सञ्जाताः काननोदरे ।
दृश्यन्ते वारणाः केचिन्मध्यमास्ते प्रकीर्तिताः ॥ ५९ ॥

प्रायशो मन्दगतयो हीनकण्ठस्वरा भृशम् ।
अलसाश्च श्रमजिता क्षुत्तृष्णाकर्शिता मुहुः ॥ ६० ॥

दूराध्वादिषु भीताश्च तनुदन्तास्तनूदराः ।
शश्वत्कोपा निःश्वसन्तो मलिनाङ्गा मदोज्झिताः ॥ ६१ ॥

बलहीना वारणास्ते रहस्यावासलालसाः ।
अकालव्याधयश्चापि मध्यमा मितभोजनाः ॥ ६२ ॥

शकुन्तांशा ये तु गजा दृश्यन्ते काननोदरे ।
प्रोच्यते लक्षणं तेषां शृणु तत् सुरनायक ॥ ६३ ॥

क्षुधया च तृषा नित्यं पीडिता दुर्बला गजाः ।
मिथः कलहचर्यादीन् कलयन्ति क्षणान्तरे ॥ ६४ ॥

श्रान्ताश्च भयबाहुल्याः कृशाङ्गा बहुमूत्रकाः ।
मैथुनेष्वासक्तिभाजः सन्ततं लुलिताशयाः ॥ ६५ ॥

शृङ्खलाभिः कर्णतालैर्झीकारनिनदैरपि ।
चलध्वनिकराश्चैते मध्यमा निश्चिताः सुरैः ॥ ६६ ॥

जायन्ते वारणाः केचिन्मत्स्यांशाः काननोदरे ।
पुरे वा पत्तने वापि ते च वर्ज्याः शुभार्थिभिः ॥ ६७ ॥

क्षुद्राशया ह्रस्वकाया बहुरोमशरीरिणः ।
बलप्रिया मिताहाराः वक्रगत्या भयप्रदाः ॥ ६८ ॥

कपटाश्च चलन्नेत्रा दुस्साध्याः शिक्षणादिषु ।
संत्याज्या भूमिपालैस्ते कुबुद्धिफलदायिनः ॥ ६९ ॥

चलच्छीर्षाश्चलन्नेत्राः शिक्षासु विमुखा गजाः ।
दुर्बला ये ते लतांशाः संत्याज्या मूढचेतसः ॥ ७० ॥

विस्मरन्त्यचिरेणैव शिक्षितानि प्रयत्नतः ।
धूसरा बलहीनाश्च न चिरंजीविनो मताः ॥ ७१ ॥

सुमांशा वारणाः केचिन्निवसन्ति महीतले ।
अलंकारप्रिया नित्यमल्पप्रज्ञाः शिक्षणादिषु ॥ ७२ ॥

पुष्पगन्धाः क्षीणबलाः सुखवासकृतादराः ।
अशक्ताः सर्वकार्येषु प्रीतिमन्तोऽपि जन्तुषु ॥ ७३ ॥

फलपुष्पलतादीनां वीक्षणे बद्धचेतसः ।
प्रायशो मन्दगतयो लालनार्हाश्च निश्चिताः ॥ ७४ ॥

घेन्वंशाः पद्मिनः केचिद् दृश्यन्ते वनवासिनः ।
मध्यमास्ते च निर्दिष्टाः संत्याज्याः शुभकर्मणि ॥ ७५ ॥

दीर्घदन्ता दीर्घवाला: कृशाङ्गाः स्थूललोचनाः ।
प्रायशो मन्दगतयो बहुभक्ष्याः सुमेधसः ॥ ७६ ॥

अशान्ता अपि भीताश्च सुखवासाश्च ते मताः ।
एवं षड्विधमाख्यातं मध्यमं हस्तिनां कुलम् ॥ ७७ ॥

नानर्थाय न लाभाय निर्दिष्टं नृपमन्दिरे ।
अधमं च कुलं प्रोक्तं षड्विधं हस्तिनां तथा ।
तेषां च लक्षणं वक्ष्ये लोककार्यार्थसिद्धये ॥ ७८ ॥

स्वदोषान्मुनिशापाच्च सत्कुलीना अपि स्वयम् ।
ते वारणा मूढचित्ता नानादोषप्रपीडिताः ॥ ७९ ॥

राक्षसासुरपैशाचसिंहशार्दूलमर्कटाः ।
वने दृष्टा प्राणिनो ये तदंशा जनिताः क्वचित् ॥ ८० ॥

दृप्तास्ते वारणा एते क्षोभयन्ति क्षमामिमाम् ।
अधमाश्च नृपैस्त्याज्या लोकक्षेमाय दीक्षितैः ॥ ८१ ॥

ते राक्षसांशा निर्देश्याः दृढस्थूलकराङ्घ्रयः ।
आरक्तनेत्रा ये तुङ्गा दन्तघट्टनतत्पराः ॥ ८२ ॥

वधहिंसाकारिणश्च दुर्धर्षा वेगगामिनः ।
निशासञ्चारशीलाश्च प्रचण्डाश्च पलाशनाः ॥ ८३ ॥

विमुखाः सान्त्ववाक्येषु घ्नन्ति यन्तॄनपि क्वचित् ।
राक्षसा इव संक्षोभं कुर्वन्ति क्रूरचेतसः ॥ ८४ ॥

[illegible] वक्रास्याः कष्टक्रियाः ।
[illegible] वर्ज्या मानवैः शुभकाङ्क्षिभिः ॥ ८५ ॥

महाकाया स्थूलदन्ता वधकार्यादितत्पराः ।
दृश्यन्ते ये द्विपानेतानसुरांशान् विदुः सुराः ॥ ८६ ॥

अप्रधर्ष्याः प्रचण्डाश्च नरगन्धासहिष्णवः ।
हरिणानां च धेनूनां नराणां पक्षिणामपि ॥ ८७ ॥

वधासक्ता नित्यदृप्ताः प्रकोपा निन्द्यलक्षणाः ।
पुरक्षोभकराः शश्वत् त्याज्यास्ते वनभूमिषु ॥ ८८ ॥

कृशदेहा ह्रस्ववालाः कृशदन्ताश्च ये गजाः ।
बालहिंसाकरा नित्यं चौर्यासक्ता भयार्दिताः ॥ ८९ ॥

ते वारणाः पिशाचांशा हठात् पतनकारिणः ।
दिशाभ्रमणशीलाश्च रक्तमांसाभिलाषिणः ॥ ९० ॥

कठोरनिनदा भस्मदेहाः पितृवने रताः ।
विमुखाः सान्त्ववाक्येषु संत्याज्या गिरिकानने ॥ ९१ ॥

सिंहवद् गर्जनरवाः सटाव्याप्तशिरस्तटाः ।
भीकराकृतयः प्रायो भ्रमन्ति वनभूमिषु ॥ ९२ ॥

हठात् पवनवेगाश्च रात्रिसंचरणादराः ।
भृशमुच्छ्रितलाङ्गूला ज्वलन्नेत्राश्च ये गजाः ॥ ९३ ॥

सिंहाक्षास्ते तु सर्वेऽपि पश्चास्या बलपूरिताः ।
कृशोदराः पुष्टपृष्ठाः शौर्यविक्रान्तिशालिनः ॥ ९४ ॥

अतुष्टाः पुरसंचारे वनसंचारलालसाः ।
असाध्याश्चावशास्ते तु वर्जनीया हि वारणाः ॥ ९५ ॥

दीर्घदन्ता वक्रनखाः कपटा गूढचेतसः ।
प्राणिनां भयदाः प्रायो ये गजा वनलोलुपाः ॥ ९६ ॥

मदिरारक्तमांसादिरताः परमकोपनाः ।
धावने विवृतास्याश्च बलाढ्याः सामदूरगाः ॥ ९७ ॥

शार्दूलकायरेखाभिरञ्चितास्ते तु वारणाः ।
शार्दूलांशा नृपैस्त्याज्या वध्याश्च वनभूमिषु ॥ ९८ ॥

चलचित्ता भ्रमन्नेत्राः संतताहारलालसाः ।
धावनेष्वासक्तिभाजो निरताः प्राणिताडने ॥ ९९ ॥

नितरां कृशदेहाश्च दीर्घबालाः क्षणक्रियाः ।
शिक्षाविदूरगाः शश्वद्धुंकारभयदा नृणाम् ॥ १०० ॥

एते सर्वे वानरांशाश्चाग्राह्या वनगोचरैः ।
एवमष्टाविंशतिकं द्विपानां कुललक्षणम् ॥ १०१ ॥

ज्ञात्वा महीपतिः सम्यक् चिरेणाधोरणादिभिः ।
स्वीकुर्यादुत्तमांस्तेषु गजशालासु यत्नतः ॥ १०२ ॥

पालयेत् सर्वकालेषु मध्यमान् जरितानपि ।
अधमान् हस्तिनो दूरात् त्यजेत् प्राणिहिते रतः ॥ १०३ ॥

वनजातान् शुभगुणान् शुभलक्षणभासुरान् ।
ज्ञात्वा महीपतिर्धीमान् बन्धयेत् कार्यसिद्धये ॥ १०४ ॥

गजान् तानानयेद् युक्त्या पालयेद् गजमन्दिरे ।
नानाराष्ट्रसमृद्ध्यर्थमेवं कार्यं विचक्षणैः ॥ १०५ ॥

इति गजशिक्षायां द्वितीयः पटलः ।

---

## अथ तृतीयः पटलः

उत्तमेष्विह कार्येषु सद्भटा निश्चिता गजाः ।
सन्मित्राण्यापदि तथा मानितास्ते जयप्रदाः ॥ १ ॥

बाल्ये वा यौवने काले वयस्यन्तेऽपि वा क्वचित् ।
नृणां साह्यप्रदातारस्ते सृष्टाः पद्मयोनिना ॥ २ ॥

अतः सन्मानमर्हन्ति मातङ्गाः शुभलक्षणाः ।
कुलीनाः शान्तचित्ताश्च दर्शनात् पुण्यदा नृणाम् ॥ ३ ॥

वारणैरेव सेनानामुत्तमं बलमीरितम् ।
निश्चिता जयलक्ष्मीश्च यत्र ते करिणः स्थिताः ॥ ४ ॥

असाध्यान्यपि कार्याणि योधैर्वा तुरगादिभिः ।
सुलभं साधयन्त्याशु वारणा एव विक्रमैः ॥ ५ ॥

हस्तिनां कीर्तनं पुण्यं दर्शनं पोषणादिकम् ।
श्रेयसे महते नित्यमित्याहुः परमर्षयः ॥ ६ ॥

नयनानन्ददास्तेषां लीलाश्चिरविलोकिताः ।
न तृप्तये भवन्त्येव बालादीनामपि क्षितौ ॥ ७ ॥

तस्मात् सर्वप्रयत्नेन मानयेद् वारणान् नृपः ।
रिपुसेनाभञ्जने च भारोद्वहनकर्मणि ॥ ८ ॥

समर्था वारणा एव मृगयादिक्रियास्वपि ।
दूराध्वानेऽप्यखिन्नाश्च पटवो धावने गतौ ॥ ९ ॥

बहूपकारिणो लोके प्राणसाधारणावधि ।
स्वकार्येष्वप्रमत्तास्ते नेतॄणां वशगा गजाः ॥ १० ॥

संकेतज्ञाश्च शब्दज्ञा नाथचित्तप्रहर्षदाः ।
समरे यमरूपाश्च परसेनाप्रभञ्जकाः ॥ ११ ॥

प्रशान्तमानसा नित्यं निजयूथनिवासिनः ।
विक्रमक्रमपङ्क्त्यादौ पुरोगाः पूर्णपौरुषाः ॥ १२ ॥

नीलमेघनिभाः केचित् परे पर्वतसन्निभाः ।
शुभदाः शुभदन्ताश्च सौख्यदाश्चासनादिषु ॥ १३ ॥

मृगयारसिकाः केचिद् जलक्रीडारताः परे ।
मनस्विनो भद्रगजा मन्दवश्याः परे गजाः ॥ १४ ॥

मिश्रसंकीर्णवंश्याश्च क्रियादक्षास्तरस्विनः ।
दीर्घकालस्मृतिस्त्वेषां कल्पिता पद्मयोनिना ॥ १५ ॥

विरोधमुपकारं च चिरं बध्नन्ति मानसे ।
प्रीतिपूर्वं पोषणाद्यैर्मानिता यदि हस्तिनः ॥ १६ ॥

जायते परमा तुष्टिर्मुनीनां च दिवौकसाम् ।
देवांशा एव ते सर्वे गजा भूतलवासिनः ॥ १७ ॥

विन्ध्यस्य सानुभागेषु तटेषु हिमभूभृतः ।
काश्मीरदेशे कांभोजनेपालक्षोणिषु क्वचित् ॥ १८ ॥

बाह्लीककेकयाङ्गादौ वङ्गकोसलभूमिषु ।
कलिङ्गमत्स्यसौवीरोत्कलभूमितले क्वचित् ॥ १९ ॥

काननेषूत्तमेष्वेवं मध्यमे भल्लभूतले ।
गङ्गायमुनयोर्मध्ये लाटकाननभूमिषु ॥ २० ॥

द्राविडेष्वपि कर्णाटेष्वटवीवीथिषु क्वचित् ।
गम्भीराकृतयो नित्यं दानधाराप्रवर्षिणः ॥ २१ ॥

चलत्पर्वतसंकाशा भासन्ते वारणोत्तमाः ।
कुलीना बलसम्पन्नाः शतशोऽथ सहस्रशः ॥ २२ ॥

स्वेच्छाविहारशीलाश्च गन्धर्वसमवृत्तयः ।
इतस्ततः संचरन्ति लोकक्षेमाय तान् विदुः ॥ २३ ॥

इति (नारद)गजशिक्षायां तृतीयः पटलः

---

## अथ चतुर्थः पटलः

द्विपानां बन्धनं युक्त्या कथयन्त्यटवीतले ।
सर्वदेशक्षेमसिद्ध्यै मुनयो दिव्यचक्षुषः ॥ १ ॥

तस्यापि लक्षणं वक्ष्ये सावधानमनाः शृणु ।
निबिडोत्तुङ्गसुस्निग्धवृक्षौघा यत्र निर्भराः ॥ २ ॥

दृश्यन्ते पर्वतप्रान्ते नदीकूलेषु वा क्वचित् ।
आरण्यमध्यभागे वा निर्भये जलपूरिते ॥ ३ ॥

नित्यवासं प्रकुर्वन्ति बृन्दशस्तत्र वारणाः ।
स्वेच्छासंचारसंहृष्टा बलविक्रममण्डिताः ॥ ४ ॥

केचिदेकान्तवासाश्च परे शीतस्थले स्थिताः ।
संतृप्ता यान्ति सर्वत्र पुत्रपौत्रादिसंवृताः ॥ ५ ॥

मिथो विहारसंसक्ताः स्वतन्त्रा दुःखदूरगाः ।
स्वदत्ताहारसंतुष्टकरिणीपार्श्वगामिनः ॥ ६ ॥

वनाद् वनान्तरं यान्ति यूथपा हृष्टमानसाः ।
गजग्रहणसिद्ध्यर्थं बन्धनं तत्र कल्पयेत् ॥ ७ ॥

आधोरणैर्वनचरैर्गजवृत्तान्तवेदिभिः ।
तत् कार्यं साधयेत् प्राज्ञो राष्ट्रक्षेमादिसिद्धये ॥ ८ ॥

यत्र द्विपानामावासो दृश्यते वनभूमिषु ।
ज्ञात्वा चिराय तं देशं युक्त्या भूपो वनेचरात् ॥ ९ ॥

वीरान् योधांश्च विविधान् मृगयाप्राप्तकौशलान् ।
गजबन्धनकार्याय योजयेत् क्षेमसिद्धये ॥ १० ॥

युक्त्या तु बन्धनस्थाने चिरदृष्टेन वर्त्मना ।
गूढेन गमनं श्लाघ्यमाधोरणभटादिभिः ॥ ११ ॥

भेर्यो गम्भीरनादाश्च काहल्यश्च विशेषतः ।
पटहानां शतान्येवं श्रृङ्खलाराशिरेव च ॥ १२ ॥

रज्जूनां पटलान्येवं सृणिः पाशो मृगाक्षिकः ।
शिक्षिता द्विपवर्याश्च करिण्यश्च दशाधिकाः ॥ १३ ॥

आधोरणा बुद्धिमन्तो धिषणाबलशालिनः ।
पुरुषाणां सहस्रं च क्वचित् तदधिकं तु वा ॥ १४ ॥

आहारार्थं च यद् द्रव्यं तत् सर्वमपि भूपतिः ।
द्रव्याण्यन्यानि युक्त्या हि संपाद्यार्थप्रदानतः ॥ १५ ॥

तोषयित्वा वीरभटान् मानैर्विविधैर्नृपः ।
गूढं नयेद् वनभुवं तानि द्रव्याणि कालतः ॥ १६ ॥

सूक्ष्मधीभिर्गजैरेतद् ज्ञातं यदि वनोदरे ।
लीना भवेयुः प्रायेण वनकुञ्जे दृढे वने ॥ १७ ॥

व्यर्थं भवेद् बन्धकार्यमतो गूढं प्रयोजयेत् ।
सर्वा अपि च सामग्रीर्विविधा बन्धनार्थकाः ।
रहिता दोषलेशाद्यैरानयेत् काननोदरम् ॥ १८ ॥

हस्तिनां पदपङ्क्त्या च रींकारैरथवा वने ।
शाखाभिस्त्रुटिताभिश्च गजवर्त्मेति लक्षयेत् ॥ १९ ॥

यस्मिन् वने हस्तिबन्धः स्थाप्य इत्येवमादिभिः ।
वनेचरैर्वीरभटैरुक्तमाहृत्य भाषणम् ॥ २० ॥

स्वयं युक्त्या समालोच्य सामग्रीनयनादिकम् ।
फलप्रदं समादिष्टं मुनिभिस्तत्त्ववेदिभिः ॥ २१ ॥

उन्नतेष्विह वृक्षेषु शाखाच्छन्नस्थलं क्वचित् ।
योधादिगूढवासाय निर्दिशेत् कार्यसिद्धये ॥ २२ ॥

वातवर्षातपसहं भक्ष्यभोज्यादिभिर्युतम् ।
स्थानं तत् प्राप्य ते वीरा गजागमनकाङ्क्षया ॥ २३ ॥

मौनमाश्रित्य कालेन संकेतकरभङ्गिकैः ।
स्थानं तद् रक्षणीयं हि गजबन्धस्य सिद्धये ॥ १४ ॥

शतैः सहस्रैर्वीराणां गणैस्तदधिकैरपि ।
वन्यवारणसंख्यानुगुणं तत् पालयेच्चिरात् ॥ २५ ॥

पञ्चषैर्दिवसैर्वापि दशभिर्वा दिनक्रमैः ।
मासकालेन वा सिद्धिर्बन्धने मुनिनिश्चिता ॥ २६ ॥

स्वेच्छाविहारक्रमतो द्विपानां गमनं क्वचित् ।
तेषां मौढ्याद् विधिवशान् क्वचिद् गमनमीरितम् ॥ २७ ॥

गूढस्थानं भटानां च सामग्रीस्थानमेव च ।
यत्नतः पालनीयं हि गजबन्धस्य सिद्धये ॥ २८ ॥

वनभूमौ तैस्तु गजै र्मदोद्रेकैः क्वचित् स्थले ।
क्रियते समरक्षोभो मिथः कलहघट्टनम् ॥ २९ ॥

तच्च ज्ञात्वा स्फुटं लक्ष्म तत्र बन्धं प्रकल्पयेत् ।
क्वचित् प्रकाशसंचारः क्वचिल्लीनक्रियादिकः ॥ ३० ॥

एवं बहुविधं कार्यं गजानां काननोदरे ।
मुनीन्द्रैः सम्यगादिष्टं तच्च ज्ञेयं नृपादिभिः ॥ ३१ ॥

गजसंचरितं स्थानं स्नानपानादिचिह्नितम् ।
ज्ञात्वा चिरेण कालेन वनवीरैः क्रमाद् वने ॥ ३२ ॥

बन्धस्थानं प्रयोक्तव्यमप्रकाशप्रयत्नकम् ।
मनोहराः शिक्षिताश्च बलपौरुषमण्डिताः ॥ ३३ ॥

यौवनालङ्कृता धीराः करिण्यो दशविंशतिः ।
क्वचित् तदाधिका वापि मोहार्थं वनहस्तिनाम् ॥ ३४ ॥

अदूरे कुञ्जपुञ्जादौ निगूढं स्थापयेत् प्रभुः ।
गजानपि महाकायान् स्ववशस्थान् सुमानितान् ।
बलपौरुषसंपन्नान् निपुणान् मृगयादिषु ॥ ३५ ॥

साधोरणान् सभृत्यांश्च सज्जान् बन्धनकर्मणि ।
तद्रक्षकान् धीरकार्यान् वारणान् सायुधानपि ।
तेषां पृष्ठस्थले पार्श्वे स्थापयेन्मतिमान् प्रभुः ॥ ३६ ॥

तत्पपोषणं च संकल्प्यमेकमासावधिक्रमात् ।
निर्मानुषं च निःशब्दं निर्भयं तत् स्थलं गजाः ॥ ३७ ॥

मत्वा हि क्रमसंचारं स्वेच्छया कलयन्ति ते ।
सनाथैः करिणीभिश्च शतसंख्यादिकैर्गजैः ॥ ३८ ॥

समाक्रान्ते वनोद्देशे निगूढस्थलवासिभिः ।
प्रासमध्याह्नकाले वा बन्धनं कार्यसिद्धये ।
सायं कचिद् वनोद्देशे प्रशस्तं च प्रकीर्तितम् ॥ ३९ ॥

न प्रशस्तो रात्रिबन्धो न फलायापकीर्तये ।
तस्मान्निश्चित्य समयमुचितं पृथिवीपतिः ॥ ४० ॥

गत्वा स्वयं च कुतुकाद् गूढस्थाने सुरक्षितः ।
सेनेशमन्त्रिसहितो गजबन्धं समादिशेत् ॥ ४१ ॥

स्थानं तद् दूरतो रक्ष्यं सायुधैर्वनवासिभिः ।
महातरूणां खण्डैश्च शृङ्खलाभिरनेकशः ॥ ४२ ॥

निरुन्ध्याद् द्विपमार्गं तं युक्त्या कालेन भूपतिः ।
स्थलानुगुणमेवं तु दिग्भागत्रयरक्षणम् ॥ ४३ ॥

एको मार्गः समुद्दिष्टो गजागमनहेतवे ।
अदूरे तस्य करिणीर्भटांश्च स्थापयेत् क्रमात् ।
युक्त्यैवं काननोद्देशे गजबन्धस्थलं हितम् ॥ ४४ ॥

अश्विन्यामथ रोहिण्यां मृगशीर्षे शुभप्रदे ।
मखायामथ पुष्ये वा हस्ते तारे जयोज्ज्वले ॥ ४५ ॥

स्वात्यां वा रेवतीतारे नाथमङ्गलदायिनी ।
शुभे दिने शुभे लग्ने प्रस्थानं जयदायकम् ॥ ४६ ॥

नृपस्य जयलक्ष्मीश्च प्रजानां मङ्गलानि च ।
वदन्ति शुभकालेषु लोकक्षेमाय भूभृताम् ॥ ४७ ॥

नानाविधं च शकुनं प्रसमीक्ष्य भटादिकान् ।
प्रेरयेद् बन्धनार्थाय लब्ध्वा दैवनिरीक्षणम् ॥ ४८ ॥

मदाविष्टैरिभैः कैश्चिद्देशक्षोभो निरीक्षितः ।
प्रक्षोभो वनलक्ष्म्याश्च प्रशान्तानां प्रपीडनम् ॥ ४९ ॥

एवं प्रकारभङ्गस्तु विविधः क्षितिमण्डले ।
अतस्तच्छान्तये धीरान् धनधान्यादिसाद्यतः ॥ ५० ॥

गजग्रहणकार्येषु योजयेत् पृथिवीश्वरः ।
स्वराष्ट्रकाननोद्देशे बन्धनं समुदीरितम् ॥ ५१ ॥

यदा यदा देशनाशो वृद्धिर्वा गजसंततेः ।
तदा बन्धनमादिष्टं सर्वप्राणिहितप्रदम् ॥ ५२ ॥

आधोरणैराप्तगजैर्व्याधैर्वनचरैरपि ।
बहुधा स्वभटाद्यैश्च तत् कल्प्यं नारदेरितम् ॥ ५३ ॥

इति गजशिक्षायां चतुर्थः पटलः

---

अथ पञ्चमः पटलः

गजबन्धनसिद्ध्यर्थं क्वचिद् दुर्गप्रकल्पनम् ।
तच्च गूढं स्थापनीयं दिनैर्मासैस्तु वा नृपैः ॥ १ ॥

गजप्रचारमालोक्य काननं चिरकालतः ।
द्वियोजनतलं खात्वा दूरतः परिखां दृढाम् ॥ २ ॥

विपुलां नित्यसलिलां सस्यशोभितटोज्वलाम् ।
अगाधां खातयित्वा तु तद् रक्षेद् वनवासिभिः ॥ ३ ॥

पुण्ड्रेक्षुकदलीसस्यस्थापनं द्विपमोहकृत् ।
महीरुहाणां वीथी च संवर्ध्या तत्र सिद्धये ॥ ४ ॥

निगूढवर्त्मना सर्वं साधयेत् तत्र भूपतिः ।
एवं कालेन महता वञ्चिता वनवासिनः ॥ ५ ॥

निर्भयं तत् स्थलं मत्वा तमागच्छेयुरादरात् ।
वनलक्ष्म्याक्रान्तचित्ताः सस्याद्यैश्च विशेषतः ॥ ६ ॥

आयान्ति हस्तिनः प्रायः सकुटुम्बा विनोदिनः ।
अन्तस्थलं प्रविष्टांस्तान् ज्ञात्वा वनचरैर्भटैः ।
तान् सर्वान् बन्धयेद् राजा देशक्षेमाय दीक्षितः ॥ ७ ॥

प्रक्लृप्तां परिघां तत्र पालयेद् गूढपूरुषैः ।
यदा विशति निश्शङ्कं परिघामध्यभूतलम् ॥ ८ ॥

निर्भीकं हस्तिनां बृन्दं ज्ञात्वा तत् तरुवासिनः ।
सहसागत्य ते वीराः संकेताहूतपूरुषाः ॥ ९ ॥

भीषयेयुस्तर्जनाद्यैः पटहावलिनिस्वनैः ।
कर्णारुन्तुदरावैश्च हाहाकारादिभिर्वने ॥ १० ॥

परिघाया द्वारभागं निरुन्ध्यात् सर्वयत्नतः ।
करिणीभिः शृङ्खलाभिर्दारुखण्डैर्दृढैस्तथा ॥ ११ ॥

अन्तस्थान् भ्रमतो भीत्या दिक्षु सर्वासु वारणान् ।
करिणीसहितान् सर्वान् सवत्सानपि भूमिपः ॥ १२ ॥

निरुन्ध्याच्च निराहारान तर्जनाद्यैर्विशेषतः ।
द्वारभूमिं दारुखण्डैः पिहितां शृङ्खलादिभिः ॥ १३ ॥

रक्षितां करिणीभिश्च निरुन्ध्याद् वीरमण्डलैः ।
प्रथमे दिवसे युक्त्या भृशं गोप्या वनद्विपाः ॥ १४ ॥

अन्तस्था दुःखतः केचिदप्राप्य स्वगतिं तदा ।
क्रुद्धाः संभ्रमवेगाद्यैस्तद्द्वारस्थांस्तु रक्षिणः ॥ १५ ॥

ताडयेयुर्नाशयेयुः पीडयेयुरनेकधा ।
संघीभूय प्रयत्नेन गजबृन्देन तद्वनम् ॥ १६ ॥

क्षुण्णं भग्नं च बहुधा निश्शोभं परिदृश्यते ।
द्वितीये दिवसे प्राप्ते क्षुत्पिपासाभयार्दितान् ॥ १७ ॥

धावतः परिघामध्ये परिश्रान्तांश्च वारणान् ।
मृदुवाक्यप्रयोगाद्यैः शान्तकोपान् महीपतिः ॥ १८ ॥

बन्धयेद्विविधोपायैराधोरणभटादिभिः ।
प्रवेशयित्वा युक्त्यादौ परिघान्तस्थलं नृपः ॥ १९ ॥

करिणीर्हस्तिपान् वीरान् सायुधान् निपुणानपि ।
वन्यानिभान् बन्धयेच्च देशक्षेमादिसिद्धये ॥ २० ॥

अव्रणा हस्तिनः सर्वे बन्धेऽस्मिन् परिरक्षिताः
प्राप्नुयुर्मानुषवशमचिराच्छान्तमानसाः ॥ २१ ॥

अत एव श्रेष्ठतममिमं बन्धं विदुः सुराः ।
प्रतिदेशं प्रयोक्तव्यो बन्धोऽयं क्षेमसिद्धये ॥ २२ ॥

अथवा यत्र बाहुल्यं हस्तिनां दृश्यते वने ।
तत्रापि फलदोऽयं हि नारदस्य वचो यथा ॥ २३ ॥

यस्मिन् भागेऽरण्यतले जलपूरः प्रदृश्यते ।
गिरेःसानुतटे वापि नद्यास्तीरेऽथवा क्वचित् ॥ २४ ॥

वारिबन्धस्तत्र कल्प्यो गजग्रहणहेतवे ।
एकस्मिन्नवनीभागे पार्श्वयोर्वा जलस्थितिः ॥ २५ ॥

स्थलानुकूलमेवं हि सोऽयं बन्धः प्रकल्पितः ।
फलं ददाति सहसा हस्तिनां भूभृतामपि ॥ २६ ॥

बन्धमेतं श्रेष्ठमिति प्रवदन्ति सुरोत्तमाः ।
जलावगाहनासक्ता मध्याह्ने प्रायशो गजाः ॥ २७ ॥

वनभागेषु तत्तीरमाधावन्त्यातपार्दिताः ।
निकटावासभूभागाद् गिरिसानुतटादपि ॥ २८ ॥

तापप्रशान्तये केचित् करिणीभिरनुद्रुताः ।
कौतूहलाद् यूथनाथनिर्दिष्टेन पथा वने ॥ २९ ॥

तथा समागतान् ज्ञात्वा वृक्षस्थैर्वनवासिभिः ।
नृपो वीरभटैराशु तं मार्गं भयपुञ्जितम् ॥ ३० ॥

निरुन्ध्याद् वृक्षखण्डाद्यैः शिलाखण्डैश्च रज्जुभिः ।
शृङ्खलाभिश्च पूलालैर्गतिरोधकवस्तुभिः ॥ २१ ॥

कण्टकैरिष्टकाभिश्च पाशैश्च बहुमुष्टिभिः ।
समन्ततो भीषयेच्च पटहध्वनिगर्जनैः ॥ २२ ॥

ढक्काताडननादैश्च तथायुधरवादिभिः ।
तच्च स्थानं यत्र गजा धावन्ति भयमोहिताः ॥ २३ ॥

युक्त्या संरक्षयेद् धीमान् यत्नैश्च विविधैरपि ।
सर्वत्र कुपिता नागाः क्षोभयन्ति भृशाभृशम् ॥ २४ ॥

कठोररींकाररवं कलयन्त्येव ते क्षणात् ।
वनं च प्राणिवर्गं च भिन्दन्ति बहुधा क्रुधा ॥ २५ ॥

इतस्ततश्च धावन्ति बन्धमोचनहेतवे ।
तस्मात् सर्वप्रयत्नेन दिक्षु सर्वासु हस्तिनाम् ॥ २६ ॥

बहिर्गमनमार्गं तं निरुन्ध्याद् वनवासिभिः ।
क्रमाद् द्वित्रिदिनेष्वेते मूढा वनगजा भृशम् ॥ २७ ॥

श्रान्ताः क्षुधार्ताः संत्यक्तकोपाद्याः काननोदरे ।
सहसा मानुषवशमाप्नुयुर्विषयैषिणः ॥ २८ ॥

पूर्वोक्तेनैव मार्गेण तत्स्वीकरणमादिशेत् ।
महीपतिः स्वराष्ट्रस्य कीर्तिलाभादिसिद्धये ॥ २९ ॥

गजसञ्चरिते भागे कानने गिरिसानुषु ।
उद्याने वारण्यतले पञ्चषड्वारणोत्तमाः ॥ ४० ॥

मदोद्धता मूढचित्ता बलपौरुषमण्डिताः ।
इतस्ततः संचरन्ति स्वेच्छासंचारलालसाः ॥ ४१ ॥

अनादृत्यापदां स्थानं यौवने तु विशेषतः ।
तथा गतान् वनचरान् काममोहवशंगतान् ॥ ४२ ॥

ज्ञात्वा सुदूरतो वृक्षात् शनैरागत्य सङ्कटाः ।
चोदयेयुस्ततस्समीपं कारिणीर्वशवर्तिनीः ॥ ४३ ॥

मदालसा यौवनाढ्यास्ताः करिण्यस्तु कानने ।
मञ्जुलां गतिमासाद्य गच्छन्त्यभिमुखं क्रमात् ॥ ४४ ॥

पुरतः पार्श्वयोरेवं मञ्जुलाङ्गीर्वशा वने ।
यौवनोल्लासभाजस्तु केचिद् वनगजास्तदा ॥ ४५ ॥

निरीक्ष्य कुतुकात् तासामाह्वानाय कृतत्वराः ।
गमिष्यन्त्यचिरेणैव कामलोलितमानसाः ॥ ४६ ॥

आधोरणैर्मस्तकस्थैः प्रेरितास्ता वशाः क्रमात् ।
रज्जुभिः शृङ्खलाभिश्च मोहितान् वनहस्तिनः ॥ ४७ ॥

सहसा बन्धयेयुस्तान् युक्त्या प्रेरणयापि च ।
तामापतन्तीं विपदमनादृत्य वनेचराः ॥ ४८ ॥

कामाढ्या हस्तिनः शान्तास्तद्वशस्थाः कुतूहलात् ।
शृङ्गारलीला विविधा दर्शयन्त्यात्मतुष्टये ॥ ४९ ॥

कामाधिक्यान्मूढभावान् निर्भीकान् पार्श्वतः स्थिताः ।
सलीलं बन्धयेयुस्तान् करिण्यः शृङ्खलादिभिः ॥ ५० ॥

रज्जुभिश्च दृढैः काले यन्तृयुक्त्या च कानने ।
तादृशान् पञ्च षट् सप्त दश वा वन्यवारणान् ॥ ५१ ॥

बद्धान् प्रशान्तकोपादीन् सवशान् मन्दगामिनः ।
मनुष्यवशमापन्नानानयेयुर्महीपतिम् ॥ ५२ ॥

कण्ठे पादेषु शुण्डायां पार्श्वयोरपि पृष्ठतः ।
शृङ्खलाभिर्दृढैः पाशैराबद्धान् नवहस्तिनः ॥ ५३ ॥

सुलभेनानयेद्देशं राष्ट्रकार्याभिवृद्धये ।
वशया बन्धनं यस्माद् वशाबन्धोऽयमुच्यते ॥ ५४ ॥

बन्धत्रयमिदं प्रोक्तमुत्तमं गजसिद्धये ।
गजास्तु सुलभग्राह्यास्त्वव्रणा येषु निश्चिताः ॥ ५५ ॥

अतो युक्त्या प्रकल्प्यं हि वनस्थलविभागतः ।
क्वचित् काननभूभागे गर्तबन्धं च कारयेत् ॥ ५६ ॥

राजा प्रलोभनार्थाय गजानां वनचारिणाम् ।
सहस्रदण्डां भूमिं वा द्विसहस्रमितां वने ॥ ५७ ॥

स्वीकृत्य तस्यां सस्यादीनिक्षुपुञ्जानपि क्वचित् ।
कदलीर्नारिकेलांश्च तृणानि मधुराण्यपि ॥ ५८ ॥

गजप्रियाणीतराणि वर्धयित्वा क्वचिन्नृपः ।
वर्षमेकं प्रतीक्षेत गजविश्वाससिद्धये ॥ ५९ ॥

तन्मध्ये तु महागर्तं द्विपानां पातनोचितम् ।
कारयेद्वेणुदण्डाद्यैश्छादयेत् तं च युक्तितः ॥ ६० ॥

तस्योपरि च सस्यादीन् कदलीरिक्षुपालिकाः ।
वर्धयेत् क्रमशो धीमान् मृगयारसिको नृपः ।
पार्श्वस्थवृक्षशाखासु वीरान् लीनांश्च कारयेत् ॥ ६१ ॥

निश्शङ्कं तद्वनं वीक्ष्य भक्ष्याशाक्रान्तमानसाः ।
द्विपा वन्याः समागच्छन्त्यादराद् दूरतो वने ॥ ६२ ॥

तन्यते पादविन्यासो यदा तैर्वनहस्तिभिः ।
वेणुदण्डादिभङ्गश्च तदैव परिदृश्यते ॥ ६३ ॥

हठाच्च पतनं तेषां तस्मिन् गर्ते विधीयते ।
प्रायशः समये तस्मिंस्ते गजा भीतिताडिताः ॥ ६४ ॥

अङ्गभङ्गादिकं प्राप्य भजन्ति गजजीविकाः ।
अत एवावटो बन्धो निन्द्यते मुनिपुङ्गवैः ॥ ६५ ॥

तथापि युक्त्या नृपतिः पतितानवटे गजान् ।
तान् सान्त्वयित्वा सद्वाक्यैः शपथाद्यैश्च हस्तिपैः ॥ ६६ ॥

गर्तप्रपूरणं कृत्वा मृद्भिरिष्टकसैकतैः ।
उद्धरेत् क्रमशः काले पोषयेन्मृदुभोजनैः ॥ ६७ ॥

एवं चतुर्विधं बन्धं प्रशंसन्ति महर्षयः ।
गजग्रहणयोग्यं तदादिष्टं क्षितिमण्डले ॥ ६८ ॥

वसन्तो ग्रीष्मकालश्च गजग्रहणसिद्धिदः ।
वर्षाकाले त्वप्रधर्ष्याः शरद्यपि च वासव ॥ ६९ ॥

देशं कालं वनं स्थानं हस्तिनां सन्ततिं क्रमात् ।
वनवीरैः स्वयं युक्त्या ज्ञात्वा चिरमतन्द्रितः ॥ ७० ॥

बन्धयेन्नृपतिश्रेष्ठो मनोज्ञान् वनवारणान् ।
शिशून् बालान् मध्यमांश्च स्वीकुर्यात् फलसिद्धये ॥ ७१ ॥

वृद्धान् गजान् त्यजेत् प्राज्ञः स्वतन्त्रानेव कानने ।
आनीय तानप्यथवा रक्षयेद् यत्नतः पुरे ॥ ७२ ॥

समुद्भूतं यदा तेषां पारतन्त्र्यं वनोदरे ।
तदा प्रभृति ते सर्वे वारणाः शान्तमानसाः ।
तिष्ठन्त्याज्ञासु यन्तॄणां मानुषस्नेहबन्धिताः ॥ ७३ ॥

**इति गजशिक्षायां पञ्चमः पटलः**

---

अथ षष्ठः पटलः

एवं वनस्थले बन्धस्थानभाजश्च दुःखितान् ।
वन्यान् द्विपान् नृपो युक्त्या वीतशोकभयादिकान् ॥ १ ॥

हस्तिपैः कारयेत् काले लोकक्षेमाभिवृद्धये ।
रज्जुभिः शृङ्खलाभिश्च संबद्धान् वनहस्तिनः ॥ २ ॥

रक्षितान् शिक्षितगजैर्नित्यं स्ववशवर्तिभिः ।
कालोचिताहारदानैः सान्त्वनैः स्पर्शनादिभिः ॥ ३ ॥

प्रशान्तानानयेद्देशं यात्राकल्पनतो नृपः ।
दशभिर्वा दिनैर्मासै रञ्जितान् क्रमवर्तनैः ॥ ४ ॥

गजयात्रा भृशं प्रातः सायंकाले क्वचिन्मता ।
निशायाः पूर्वभागे वा शस्यते तुष्टिकारिणी ॥ ५ ॥

शश्वत् सलिलसेवा च मार्गे छायानुसेवनम् ।
सदाहारप्रदानं च गजानां तुष्टिकृन्मतम् ॥ ६ ॥

रजतानि सुवर्णानि यानि रत्नानि भूतले ।
द्विपेन्द्राणां हि तत् सर्वं कलां नार्हन्ति षोडशीम् ।
कालानुगुणमेतेषां रक्षणं परमं हितम् ॥ ७ ॥

आधोरणास्तु धीमन्तः प्राणिवात्सल्यसंधिताः ।
गजभाषाक्रमज्ञाश्च शूराश्च दृढचेतसः ॥ ८ ॥

इङ्गितज्ञाश्च युक्तिज्ञाः क्रोधलोभविवर्जिताः ।
द्विपाहारविहारादिक्रमज्ञाः कालवेदिनः ॥ ९ ॥

सृणिकुन्तप्रयोगज्ञा द्विपसंपोषणादराः ।
गतिशिक्षासु कुशला मृगयास्वपि लालसाः ॥ १० ॥

दण्डदानादिकार्येषु क्रमशः कुलवेदिनः ।
तच्चिकित्साक्रमविदो भूपचित्तानुवर्तिनः ॥ ११ ॥

उपमर्दसहाः शश्वद् वनवृक्षादिवेदिनः ।
मार्गज्ञाः कार्यदक्षाश्च श्रेष्ठा निगदिताः सुरैः ॥ १२ ॥

एवमादिगुणैर्युक्ता हस्तिपाश्च भटादयः ।
गजानां रक्षणे बद्धश्रद्धा मान्या महीभृता ॥ १३ ॥

इति गजशिक्षायां षष्ठः पटलः

## अथ सप्तमः पटलः

नगरान्तस्थले वापि बहिर्वा मानवाधिपः ।
गजशालां नातिदूरे स्थापयेत् कार्यसिद्धये ॥ १ ॥

सा हस्तिशाला महती क्वचित् स्थाप्या फलाप्तये ।
प्राचीमुखा चोत्तरास्या सा प्रकल्प्या शुभप्रदा ॥ २ ॥

सहस्रदण्डामायामे क्वचित् तदधिकां तु वा ।
नाहे द्विगुणमानां वा ध्रुवं सल्लक्षणान्विताम् ॥ ३ ॥

स्वीकुर्याच्चतुरश्रां वा दीर्घाकारां क्वचिन्नृपः ।
प्रशस्तं कल्पनं तत्र स्थलयोग्यविधानकम् ॥ ४ ॥

प्रथमावरणं तद्वद् द्वितीयावरणावृतम् ।
तृतीयावरणं वापि निर्माप्यं गजवृद्धये ॥ ५ ॥

स्थलानुकूलं तेषां तु प्राकाराणां प्रकल्पनम् ।
गजागमनयोग्यं हि तद्द्वारं स्थापयेन्नृपः ॥ ६ ॥

एकद्वारं द्वारयुगं द्वारत्रयमथ क्वचित् ।
चतुर्द्वारयुतं वापि स्थापयेत् तत् प्रकल्पयेत् ॥ ७ ॥

कवाटैर्मण्डिता सा तु गजशाला विधीयते ।
कवाटहीनापि मता न दोषाय सश्रृङ्खला ॥ ८ ॥

अन्तःस्थले तु शालायाश्चत्वरस्य प्रकल्पनम् ।
बह्वीनां कुटिकानां च जलार्थं कल्पनं मतम् ॥ ९ ॥

दिगन्ते मध्यमे भागे भक्ष्यद्रव्यस्थलं तथा ।
नानाङ्गणयुता सा तु गजशाला सुखप्रदा ॥ १० ॥

गजवासार्हमादिष्टं तदङ्गणतलं सुरैः ।
तान्यङ्गणानि विपुलान्युन्नतानि यथाक्रमात् ॥ ११ ॥

तान्यङ्गणानि शालायां द्विशतानि शतानि वा
गजसंख्याक्रमेणैव क्वचित् तदधिकानि च ॥ १२ ॥

निर्माप्याणीह भूपालैर्गजसौख्याभिवृद्धये ।
एकैकमङ्गणं नागस्यैकैकस्य प्रकीर्तितम् ॥ १३ ॥

तृणवेदिसमायुक्तं शिलासन्नद्धशृङ्खलम् ।
पार्श्वयोः पुरतश्चैव नाहयामसमन्वितम् ॥ १४ ॥

जलवेदियुतं वापि स्थापयेद् दृढभित्तिकम् ।
दृढाच्छादनसंयुक्तं चिरकालफलप्रदम् ॥ १५ ॥

आमर्दश्चैव संमर्दो यौवने हस्तिनां भवेत् ।
नावसीदेत सा भित्तिर्न वा भिद्येत ताडनैः ॥ १६ ॥

सुधाभिरिष्टकाभिश्च दृढकल्पनमादिशेत् ।
गजशाला शिल्पिवरैर्निर्माप्या मासकालतः ॥ १७ ॥

बहिरङ्गणकल्पा च तथोपाङ्गणमण्डिता ।
शिखराद्युज्वला मध्ये करण्डमकुटान्विता ॥ १८ ॥

गवाक्षैश्च महाकायैराबद्धा सर्वदिक्ष्वपि ।
प्रत्यावरणभूभागं सद्वारं साङ्गणं मतम् ॥ १९ ॥

शिल्पिभिः कल्पयेद् भूपो गजसौख्याभिवृद्धये ।
इतस्ततश्च सञ्चारस्तेषामानयनं यथा ॥ २० ॥

यथा च सुलभप्राप्तिः सा शाला श्लाघनास्पदा ।
प्रथमावरणस्येह पार्श्वयोः शुभवेदिका ॥ २१ ॥

भटानामपि वीराणां नियुक्तानां च रक्षणे ।
नित्यवासाय सा वेदिर्निर्माप्या नारदेरिता ॥ २२ ॥

मन्दिराण्यायुधादीनां तुण्डानि सुदृढानि च ।
स्थापयेत् पार्श्वयोः प्रायः पृथग् वा मिलितानि वा ॥ २३ ॥

आहारस्थानमादिष्टं पृथगेव हि हस्तिनाम् ।
नानोपकरणार्थाय क्षुद्रशालाप्रकल्पनम् ।
युक्त्या सुखप्रदं कल्प्यं शिल्पिभिश्च नराधिपैः ॥ २४ ॥

गजशाला तु महती यत्र भाति सलक्षणा ।
तत्र मेघौघवृष्टिस्तु निश्चिता मुनिपुंगवैः ॥ २५ ॥

अतः सर्वप्रयत्नेन सर्वलक्षणभासुराम् ।
दोषहीनां हस्तिशालां स्थापयेत् क्षेमसिद्धये ॥ २६ ॥

ऋतुक्रमेण नागानां शतानामिह वासतः ।
प्राणिनां शुभसंपत्तिर्निश्चिता परमेष्ठिना ॥ २७ ॥

इति गजशिक्षायां सप्तमः पटलः

---

अथाष्टमः पटलः

वक्ष्येऽहं गूढकार्याणि गजानामिह वासव ।
आधोरणानां यन्तॄणां भूपालानां विशेषतः ॥ १ ॥

प्रयोजनाय सर्वेषामिभानां च नृणामपि ।
देवानामपि यक्षाणां गन्धर्वोरगरक्षसाम् ॥ २ ॥

मानवानां यथा कामः कल्पितः परमेष्ठिना ।
तथैव हस्तिनां कामवयश्च परिकल्पितः ॥ ३ ॥

विलासान् विविधान् प्राप्य यौवने वनचारिणः ।
हस्तिनः करिणीः काले समाश्लिष्य रहःस्थले ॥ ४ ॥

गुहायां वा कुञ्जभागे शीतले काननोदरे ।
सुगन्धकुसुमोद्रेके स्थाने स्थाने समुज्वले ॥ ५ ॥

चिरं विहृत्य ताभिस्तु गर्भदाः संचरन्ति हि ।
करिण्यः प्राप्तगर्भास्ताः स्वल्पालस्यादिबाधिताः ॥ ६ ॥

श्रान्ता गतौ परिक्लान्ता मन्दं यान्ति पदे पदे ।
मिताहारा मासकालात् प्राप्तगर्भप्रवृत्तयः ॥ ७ ॥

निवसन्ति वने गुप्ते कुञ्जे वीतभये रहः ।
स्वादुबालतृणादीनां सल्लकीनां प्रदानतः ॥ ८ ॥

करिणीपरिचर्यास्ते कल्पयन्तीह पुंगजाः ।
गर्भकाले परं प्रीत्या रक्षां कुर्वन्ति कामतः ॥ ९ ॥

पुंगजानां रक्षणेन निजयत्नाच्च कानने ।
विधिना रक्षिता काले करिणी गर्भधारिणी ॥ १० ॥

सूते शिशुं कोमलाङ्गं मासे विंशतिके क्रमात् ।
द्वाविंशन्मासकाले वा चतुर्विंशतिमासके ।
सूते सा करिणी क्वापि शिशुमेकममूल्यकम् ॥ ११ ॥

अनाघ्रातं दुष्टसत्त्वैः स्थलं शीतं सुगन्धितम् ।
प्रसवस्थानमादिष्टं करिणीनां वनोदरे ॥ १२ ॥

जातः शिशुर्मीलिताक्षः पृथुवत्ससमाकृतिः ।
निश्चलाङ्गो भवत्येष दिवसे प्रथमे वने ॥ १३ ॥

त्यक्ताहारा तु जननी तं पालयति यत्नतः ।
द्वितीये दिवसे लब्धक्षुद्बाधः स्तन्यमिच्छति ॥ १४ ॥

तृतीये वा चतुर्थे वा क्वचित् तदधिके क्रमात् ।
दिवसे नयनोन्मेषः शिशूनां विधिचोदितः ॥ १५ ॥

शश्वन्निद्रापरः प्रायो घासभक्षणवर्धितः ।
स नीत्वा मासमेकं तु जननीस्तन्यपोषितः ॥ १६ ॥

इतस्ततो भृशं धावत्ययं द्रुतपदक्रमः ।
द्वितीये तृणखादी स्यात् तृतीये सल्लकीं स्पृशेत् ॥ १७ ॥

चतुर्थे मासि बालोऽयं जनन्या सह गच्छति ।
नातिदूरस्थलं हर्षात् स्वीयकाननभूमिषु ॥ १८ ॥

पञ्चमे बहुलीलश्च मासि प्रायेण बालकः ।
एवं क्रमाद् वृद्धिभाजः शिशवः प्रतिमासकम् ॥ १९ ॥

संपुष्टाङ्गा बलाढ्याश्च बाललीलाप्रदर्शिनः ।
तटाकांश्च नदीर्वीक्ष्य गिरिशृङ्गादिकं क्वचित् ॥
नाप्नुवन्ति वने भीतिं विरलात् स्तन्यपायिनः ॥ २० ॥

इति गजशिक्षायाम् अष्टमः पटलः

---

अथ नवमः पटलः

द्वितीये वत्सरे हस्तिशिशूनां तु बलोदयः ।
प्रायशः शीघ्रगमनं विरलं स्तन्यपानकम् ॥ १ ॥

पुण्ड्रेक्षुकदलीदण्डभक्षणे जायते रुचिः ।
विहाय जननीं दूरं भृशं धावति गर्वितः ॥ २ ॥

क्षणान्निवृत्तिश्च तथा भयक्रोधप्रपीडनम् ।
कौतूहलान्मानुषाणां समीपागमनं तथा ॥ ३ ॥

तैः साकं क्रीडनासक्तिर्भयवेगप्रकम्पनम् ।
सृणिकुन्ताद्यायुधानां दर्शने संभ्रमोदयः ।
इति संवृद्धिभाजस्ते द्वितीये वत्सरेऽर्भकाः ॥ ४ ॥

तृतीये वत्सरे प्रायो गजशिक्षा विधीयते ।
सहसा फलदेत्येवं नारदेन विनिश्चिता ॥ ५ ॥

तत्र भेदं विजानीयुर्हस्तिपाला वयः क्रमात् ।
तृतीयश्च चतुर्थश्च वत्सरः पञ्चमः क्वचित् ॥ ६ ॥

षट्सप्तमावधि तथा शिक्षाकालः किलोदितः ।
समां प्राप्य तृतीयां तु शिशवः त्वरितक्रमाः ॥ ७ ॥

दृश्यदन्ताः परं केचित् तीक्ष्णमेधासमुज्ज्वलाः ।
सान्द्रत्वचः सन्धिबला रक्तबिन्दद्वानना गजाः ॥ ८ ॥

बिन्दुकर्णा बिन्दुकराः सान्द्ररोमालिमस्तकाः ।
दृढस्मरणचित्ताश्च पुष्टाङ्गा बालवारणाः ॥ ९ ॥

काम्यरींकारनिनदा यन्तृवाक्यस्थिता दृढाः ।
स्वल्पकोपाश्च दृश्यन्ते केचिल्ललितविक्रमाः ॥ १० ॥

वृक्षाणामपि भित्तीनां भञ्जनत्रुटनादिषु ।
शक्ता बद्धाशयाश्चैते मुहुराहारलालसाः ॥ ११ ॥

दृढशुण्डाः स्थूलजङ्घा दृढज्ञानोदया गजाः ।
समां चतुर्थीं संप्राप्य जलसेवनतत्पराः ॥ १२ ॥

प्रातस्सायं धावनादौ बद्धश्रद्धा महाजवाः ।
यूथसञ्चारलोलाश्च बहुलीलाप्रदर्शकाः ॥ १३ ॥

ततश्च दृढसंधानः शरवेगपदक्रमः ।
काष्ठादिभक्षणे शक्तः निद्रया वर्जितो निशि ॥ १४ ॥

कार्ये क्लेशसंहः प्रायो गतभीर्दूरवर्त्मनि ।
मानिताज्ञः क्रियालोलश्छायासेवनलालसः ॥ १५ ॥

प्राप्तकामाङ्कुरो मञ्जुनयनाननहस्तकः ।
दृढदन्तो धीरमती राजते पञ्चमेऽब्दके ॥ १६ ॥

मदवारिक्लिन्नगण्डो वनशोभादितत्परः ।
क्षणभ्रंशी गजशिशुश्चित्तहर्षकरो मतः ॥ १७ ॥

मस्तके कर्णयोः शुण्डादण्डाग्रे मदवर्षभाक् ।
संपुष्टाङ्गः क्रमज्ञश्च यूथाग्रस्थानतत्परः ॥ १८ ॥

पालकानामिङ्गितज्ञः गतभीर्विक्रमोदयः ।
प्रहृष्टमेढ्रः सततं करिणीमनुधावति ॥ १९ ॥

कामकाले क्रियानर्हदशामाप्नोति मूढधीः ।
क्षणादुज्ज्वलधीभाक् च पूर्वप्रापितशिक्षया ॥ २० ॥

पालकाज्ञानिबद्धश्च राजते गजशावकः ।
वर्षं षष्ठं समासाद्य त्यक्तालस्यादिदुर्गुणाः ॥ २१ ॥

सप्तमाब्दं समासाद्य संफुल्लनयनाननाः ।
कामवेगसमृद्धाश्च कामलीलापरायणाः ॥ २२ ॥

मत्ताश्च वनमार्गेषु स्वेच्छाकार्या दृढा गजा ।
शिक्षिताश्चोदिता वापि स्वक्रियादरशालिनः ॥ २३ ॥

नितरां सुन्दराङ्गाश्च नानाक्लेशसहाः पथि ।
दण्डनादिविदूराश्च समुज्ज्वलितधीभृतः ॥ २४ ॥

मृगयासक्तचित्ताश्च निर्भयाः काननादिषु ।
शिक्षाचारविदः प्रायः सर्वदेशेषु हस्तिनः ॥ २५ ॥

संप्राप्ते त्वष्टमे वर्षे दृढदन्ताश्च हस्तिनः ।
ततोऽपि सुन्दराङ्गाश्च पूर्णयौवनशालिनः ॥ २६ ॥

करिणीसंभोगलोलास्तदन्तिकपरायणाः ।
दानधारासिक्तगण्डा बलवीर्यमदोद्धताः ॥ २७ ॥

पर्वतारोहणे दक्षा निर्भयाश्च भवन्ति ते ।
सर्वकार्यासक्तिनुन्ना राजन्ते राजतेजसः ॥ २८ ॥

नवमं वर्षमासाद्य पूर्णपौरुषशालिनः ।
ततोऽपि सुन्दराङ्गाश्च दृढदन्ताश्च वारणाः ॥ २९ ॥

दृढप्रज्ञा जितक्लेशाः शरवेगपदक्रमाः ।
जीमूतश्यामतनवो भासन्ते मधुरस्वराः ॥ ३० ॥

दशमं वत्सरं प्राप्य स्वल्पकोपभयार्दिताः ।
पूर्णप्रवृद्धदेहाश्च पूर्णकामजवा गजाः ॥ ३१ ॥

सर्वकार्यसमर्थाश्च दृढदन्तकरादयः ।
आधोरणानां वशगा नित्यसंतोषपूरिताः ॥ ३२ ॥

अधृष्या अप्रकम्प्याश्च तोयदध्वनिकारिणः ।
गम्भीराश्च विराजन्ते पूर्णलक्षणमण्डिताः ॥ ३३ ॥

एवं प्रवृद्धाः क्रमशो नयनानन्ददायिनः ।
अमूल्या रत्नवद् भान्ति वने वा विपिने द्विपाः ॥ ३४ ॥

बहुधा लास्यलीलाश्च लोकक्षेमाय दीक्षिताः ।
देवांशा हस्तिनः सर्वे दर्शनात् पुण्यवर्धकाः ॥ ३५ ॥

अतः परं प्रवक्ष्यामि गजानां शिक्षणक्रमम् ।
अनेन सिद्धिरतुला फलाय विधिचोदिता ॥ ३६ ॥

आधोरणानां भूपानामन्येषामपि भूतले ।
कार्याणां बहुरूपाणां फलसिद्धिश्च निश्चिता ॥ ३७ ॥

गजानां जातिभेदं च कुलभेदं वयःक्रमम् ।
हस्तिलक्षणविज्ञानैर्हस्तिपैः सत्कुलोदितैः ॥ ३८ ॥

ज्ञात्वैव शिक्षा संयोज्या श्रेयसे महते भुवि ।
यथाक्रमप्रयुक्ता सा जनयेत् कीर्तिमुत्तमाम् ॥ ३९ ॥

लाभाश्च विविधा नृणां पुण्यानि च भवन्ति हि ।
अकाले तु प्रयुक्ता सा फलाय न भवेद् ध्रुवम् ॥
अतः सर्वप्रयत्नेन तां शिक्षां तु कुलागताम् ॥ ४० ॥

युक्त्या प्रयोगविद् धीमान् भूपालः प्राणिवत्सलः ।
प्रचारयेदुत्तमेषु गजेषु क्रमयोगतः ॥ ४१ ॥

उत्तमैः षोडशविधैरंशैर्ये भान्ति वारणाः ।
ये चोत्तमे कुले जाताः शान्तकाननवासिनः ॥ ४२ ॥

गजास्ते मानुषवशं प्राप्ताः शिक्षार्हलक्षणाः ।
त एते प्रथमां रेखां प्राप्नुवन्त्यप्रमादतः ॥ ४३ ॥

षड्विधैर्मध्यमैरंशैर्भासुरा ये च वारणाः ।
शिक्षायां ते अंशभाजः शिक्षिता मध्यमा मताः ॥ ४४ ॥

एते सर्वे गजा नित्यशिक्षादक्षाश्च निश्चिताः
सुमेधसः स्वभावेन शान्ता नाथप्रचोदिताः ॥ ४५ ॥

फलान्युत्पादयन्त्याशु ब्राह्मवाग्वर्णिता अपि ।
चिरवासाद् गजकुले हस्तिपो वेत्ति तत्कुलम् ॥ ४६ ॥

स्वरूपगुणशीलांश्च तत्त्वतः कालयोगतः ।
समयं देशभेदं च ज्ञात्वा शिक्षां प्रयोजयेत् ॥ ४७ ॥

क्रूरकार्यरता नित्यं बहुकोपाश्च ये गजाः ।
मूढात्मानो हठात्कारा: स्वल्पज्ञाश्च स्वभावतः ।
व्याधिग्रस्ताश्च भीताश्च कृशाः खर्वाश्च वामनाः ॥ ४८ ॥

निन्द्यकार्या बद्धवैरा राक्षसांशाश्च ये वने ।
ते सर्वे वर्जनीयाश्च शिक्षाकाले विशेषतः ॥ ४९ ॥

वधकर्मणि रक्ताश्च तथावज्ञाविधायिनः ।
कपटाश्च कृतघ्नाश्च शश्वन्निद्रापरायणाः ॥ ५० ॥

नीलदन्ता भग्नदन्ता तथा भग्ननखा गजाः ।
ह्रस्वशुण्डाः क्षुद्रवाला रक्ताक्षाः काममेदुराः ॥ ५१ ॥

काकाक्षा वानराक्षाश्च शुभलक्षणवर्जिताः ।
भल्लूकाकृतयो ये तु क्षुद्रमस्ताश्च हस्तिनः ॥ ५२ ॥

रींकारभयदा नित्यं हठाद् भयविधायिनः ।
अविनीताश्च ये काले नरगन्धासहिष्णवः ॥ ५३ ॥

ते हस्तिनो वर्जनीयाः शिक्षाकर्मसु भूमिपैः ।
एवं बहुविधं दौष्ट्यं लक्षणान्यशुभानि च ॥ ५४ ॥

चिरज्ञेयानि निर्दिष्टान्युर्वीशैर्गजपालकैः ।
अतो दुःशीलसंपन्नाः सर्वे त्याज्या गजाधमाः ॥ ५५ ॥

शुभलक्षणसंपन्नान् चिरं निश्चित्य युक्तितः ।

अनपायमपभ्रंशं सुखदं तुष्टिवर्धकम् ।
शिक्षाकल्पं प्रयुञ्जीत शुभकाले विशेषतः ॥ ५६ ॥

शिक्षा सप्तविधा प्रोक्ता नारदेन महर्षिणा ।
सर्वसिद्धिस्ताभिरेव नृपाणां च विशेषतः ॥ ५७ ॥

नराणां वारणानां च सा शिक्षा सुखदायिनी ।
तैर्विना गजजन्मानि व्यर्थानि किल भूतले ॥ ५८ ॥

व्यर्थकालक्षेप एव वने वा पत्तनेऽथवा ।
अतः श्रेयस्करी शिक्षा प्रयोज्या सार्वदेशिकी ॥ ५९ ॥

गजानां बुद्धिचातुर्यं सौशील्यं सत्कुलादिकम् ।
आजन्म सम्यग् ज्ञात्वैव धीमान् हस्तिपकः क्रमात् ॥ ६० ॥

तृतीये वत्सरे प्रायः शिक्षां प्राथमिकीं नयेत् ।
सृणेः संवारणं कर्णे निर्भीकत्वं जनान्तिके ॥ ६१ ॥

परिपालनमाज्ञायास्तथा द्रुतगतिक्रमः ।
क्वचिन्मन्दगतिश्चैव सान्त्ववाक्याभिमुख्यता ॥ ६२ ॥

एषा शिक्षा प्राथमिकी संयोज्या मुनिनिश्चिता ।
सर्वेष्वपि च कार्येषु सा साधनविधायिनी ॥ ६३ ॥

शयनं न तथोत्तानं शुण्डादण्डप्रसारणम् ।
करसंकोचकरणं वारिभञ्जनमेव च ॥ ६४ ॥

कार्यश्रमसहिष्णुत्वमाहारस्वीकृतौ क्रमात् ।
सावधानत्वमप्येवमाद्यशिक्षानिगुम्भनम् ॥ ६५ ॥

दिनक्रमेण मासेन तामेतां योजयेद् गजान् ।
उत्तमान् गजवृन्देषु मध्यमानपि वारणान् ॥ ६६ ॥

विभज्य शिक्षा सा नेया मुहूर्तदिनसंख्यया ।
विज्ञाय तत्फलं काले लभते कीर्तिमुत्तमाम् ॥ ६७ ॥

स्वाच्छन्त्ये यदि शिक्षासु स दण्ड्यो वारणो मतः।
वाचा संतर्जनं प्रायः फलाय भवति ध्रुवम् ॥ ६८ ॥

अङ्कुशेन प्रहारादिदण्डार्हाः केचिदीरिताः।
प्रहारभीत्या केचित्तु तद्दर्शनवशादपि ॥ ६९ ॥

नेतुराज्ञाकराः शीघ्रं त्यक्तालस्यादयो गजाः।
चोदनैर्हुंकारदानैर्देशभाषाप्रयोगतः ॥ ७० ॥

नेतुराज्ञां पालयन्ति गजाः केचिदुपायतः।
उपाया विविधा लोके स्वयं ज्ञेयाः प्रकीर्तिताः ॥ ७१ ॥

दण्डाश्च विविधास्तद्वत् कार्यभेदाद्विनिश्चिताः।
यथा शिशुर्मानवानां रक्षणं ताडनं भयम् ॥ ७२ ॥

लालनं च भजत्येवं शावका हस्तिनामपि।
उपायतो रक्षणीया लाल्याश्च ललितस्वरैः ॥ ७३ ॥

मनोहराह्वानवाक्यैर्दानैर्भेदैश्च तर्जनैः।
रोषारोपणकार्याद्यैरिङ्गितैरपि शावकाः ॥ ७४ ॥

गजानां च शिशूनां च करिणीनां च रक्षणम्।
कालानुगुणमेवं हि कर्तव्यं विधिकल्पितम्।
तथा शिक्षा प्राथमिकी युक्त्या नेया फलप्रदा ॥ ७५ ॥

गजानामिह शिक्षासु विविधासु स्थले वने।
खेलनं हर्षदं प्रोक्तं प्राणिनां च नृणामपि ॥ ७६ ॥

चतुर्थवत्सरारम्भे खेलनं तत् प्रयोजयेत्।
खेलनं गजशावानां विविधं देशभेदतः ॥ ७७ ॥

स्वयं विचार्य मतिमान् तन्नयेद् गजपालकः।
खेलनं वर्तुलाकारे पुरः पृष्ठे स्थले क्रमात् ॥ ७८ ॥

गमनं मध्यभागे च कोणादिषु तथा क्वचित्।
सव्यापसव्ययोरेवं शयालुत्वं निषण्णता ॥ ७९ ॥

करेण वन्दनं पुंसां निष्पन्दत्वमनेकधा ।
बहुधा पादविन्यासः क्रमव्युत्क्रमभेदतः ॥ ८० ॥

करप्रसारो ललितं मीलनं नेत्रयोरपि ।
धावनं गमनं वीक्षा पङ्क्तिशः स्थितिकल्पनम् ॥ ८१ ॥

पदस्पन्दो निश्चलत्वं खेलनं बहुधा मतम् ।
युक्त्यैतच्छिक्षयेत् सर्वं कीर्तये पृथिवीपतिः ॥ ८२ ॥

नराणामपि सर्वेषां खेलनं प्रीतिवर्धकम् ।
काले प्रयुक्तं फलदं राजते क्षितिमण्डले ॥ ८३ ॥

पञ्चमं वर्षमासाद्य यौवनोदयमण्डिताः ।
गजा धावनशिक्षासु योजनीयाः प्रयत्नतः ॥ ८४ ॥

धावनं बहुधादिष्टं रणे च मृगयास्वपि ।
सहस्रमानं दण्डानां द्विसहस्रमथापि वा ॥ ८५ ॥

लक्षीकृत्य भुवो भागं चिह्नितं गैरिकादिभिः ।
पांसुभिर्दूरदण्डैश्च व्यजनस्थापनादपि ॥ ८६ ॥

तत्र धावनमादिष्टं शावकानां विशेषतः ।
प्रातः काले धावनं तु गजानां बलपुष्टिदम् ॥ ८७ ॥

एकघाटीधावनं च द्विघाटीधावनं क्वचित् ।
प्रायो गजबलं ज्ञात्वा तामेतामादिशेत् क्वचित् ॥ ८८ ॥

भटानामिव वीराणामायुधाभ्यासधोरणी ।
धावनं हस्तिपोतानां यथाकालं फलप्रदम् ॥ ८९ ॥

क्वचित् त्रुटितवेगं च धावनं तच्च कीर्तितम् ।
क्षणाद् धावनघाटीं च प्राच्यादौ निर्दिशेद् बुधः ॥ ९० ॥

सव्यापसव्ययोरेवं घाटी तु परिकीर्तिता ।
द्रुतपादक्रमा घाटी शुण्डासंकोचघाटिका ॥ ९१ ॥

एवं बहुविधा धाटी निर्दिष्टा मुनिपुंगवैः ।
धाटीश्च धावनान्येवं स्वेषां च प्राणरक्षणम् ।
अस्खालित्यं च तत् सर्वं विन्यसेदुत्तमे गजे ॥ ९२ ॥

हस्तिपैर्मृगयाशिक्षा संयोज्या तूत्तमे गजे ।
षष्ठे वर्षे तु संप्राप्ते गजधैर्यबलप्रदे ॥ ९३ ॥

यूथपैः सह संयोज्या वनसंचारकर्मणि ।
कुञ्जस्थानं गुहास्थानं रहःस्थानं वनान्तरे ॥ ९४ ॥

वन्यानामिह सत्वानां शार्दूलावासभूतलम् ।
ऊहेङ्गितज्ञा गन्धज्ञाः सूचयन्ति क्षणान्तरे ॥ ९५ ॥

उत्तमाः शावकाः प्रायः प्रेरिता यूथहस्तिभिः ।
आधोरणैस्तथा वीरैर्वनभागस्थलानुगाः ॥ ९६ ॥

शुण्डाप्रसारैरूहाभिर्लीनान् वनचरान् मृगान् ।
गजयूथस्य साह्येन व्यक्तीकुर्वन्ति तत्क्षणात् ॥ ९७ ॥

यथा ग्लानिर्न बाधेत वातातपभयादिभिः ।
रक्षणं करिपोतानामादिष्टं वनभूमिषु ॥ ९८ ॥

आधोरणैरायुधैश्च ते रक्ष्या मृगयास्थले ।
ते त्वसाध्याः स्वभावेन कुपितास्ताडनादिषु ॥ ९९ ॥

शक्ता एवारण्यभागे तथापि परिरक्षणे ।
तेषां भीतिनिरासश्च यशसे वनभूमिषु ।
शिक्षा प्रयोज्या तेषां तु यथा प्रीतिः पदे पदे ॥ १०० ॥

सप्तमे चाष्टमे वापि दशमे वाब्दके क्वचित् ।
लब्धभारास्तु ते योज्या बलवृद्ध्यनुमानतः ॥ १०१ ॥

निम्नस्थलेषु यानं यत् तथोत्तुङ्गतलादिषु ।
गिरिसानुप्रदेशेषु यथा गच्छन्ति वारणाः ॥ १०२ ॥

आधोरणाज्ञावशगास्तथा शिक्ष्याश्च युक्तितः ।
क्रमेण लघुयानं च तथा कठिनयानकम् ॥ १०३ ॥

महाभारक्रिया काले क्रमेण गजशावके ।
फलाय मुनिभिः प्रोक्तं तथा कठिनवर्त्मसु ॥ १०४ ॥

शुण्डाप्रसारणाद्यैश्च ते शक्ता भारकर्मणि ।
विधात्रा निर्मिताः काले गजाः सर्वत्र भूतले ॥ १०५ ॥

(इतः परं नोपलभ्यते ।)

## ॥ उमापत्याचार्यविरचिता व्यक्तिनामकटिप्पणी ॥

यस्य पादाम्बुजध्यानवन्दनाद्यैरहर्निशम् ।
जायन्ते संपदः सर्वास्तं गजाननमाद्रिये ॥
सुरेशवन्द्यो भगवान् गुरुर्व्यासो महामुनिः ।
गौतमो मृगचर्मा च रैभ्यश्च मुनिपुङ्गवः ॥
नारदस्तत्त्वदर्शी च भृगुः कोलाहलो मुनिः ।
वालखिल्यः पालकाप्यो गजनादी मुनीश्वरः ॥
अग्निवेश्यस्तथान्ये च विशिष्टा मुनिपुङ्गवाः ।
गजशास्त्रप्रणेतारः पूर्वमासन् दृढव्रताः ॥
ववर्षुगनन्दवीचीन् त्रिषु लोकेषु विश्रुताः ।
प्राप्तानि तानि भूपालैश्चिरपुण्यफलोदयात् ॥
रक्षितान्यपि भूलोके भासन्ते हर्षहेतवे ।
तेष्विमान् गजशिक्षां तु नारदेन महर्षिणा ॥
प्रणीतां गूढसंदर्भां व्यक्तिनाम्न्याऽनया क्वचित् ।
करोमि मण्डितां लोके टिप्पण्या मोदवृद्धये ॥

I, १-१२ इह खलु भगवान् नारदः पङ्कजासनतनूभवः त्रिलोकसञ्चारी वीणावादनतत्परः सन् पुरा कदाचिद् देवसभां सुधर्मामाससाद । तत्र वासवजयन्त-गुरुसुरोत्तमप्रमुखैस्समर्चितः सन् स्वसंचारसंपादिता विविधाः कथा मनोहारिणी-रवर्षयत् । तादृशकथाप्रसङ्गवेलायामिन्द्रेण प्रार्थितः सन् गजशिक्षाक्रममिमं सर्वं लोकहितायाचचक्षे ललितपदार्थसंदर्भगुम्भितमिति शास्त्रावतारक्रमः । अपि च कृतत्रेता-दिषु पुण्ययुगेषु देवगुरुः बृहस्पतिः, व्यासः, गौतमः मृगचर्मनामको मुनिवरः रैभ्यमुनिः, नारदमुनिः भृगुमुनिः कोलाहलमुनिः, वालखिल्यमुनिः, पालकाप्यमुनिः, गजनाथमुनिः, अग्निवेश्यमुनिः अन्ये च केचिन्मुनिपुंगवाश्च बहुप्रकाराणि गजशास्त्राणि नानासंदर्भचरितार्थ-गुम्भितानि सर्वलोकक्षेमाय रचयित्वा सच्छिष्योपदेशद्वारा विविधानि मङ्गलान्यापुरिति नानाविधगजशास्त्रप्रणेतॄणां मुनीश्वराणां नामसंकीर्तनादिकं तावदत्र टिप्पण्यारम्भसमये सर्वमङ्गलाकटाक्षवीचिप्रसरणकरमिति विवेकः ।

निष्कृष्टार्थस्तु—सर्वलोकहितकार्यप्रभृतौ बद्धदीक्षो वासवः तथा संलापव्याजेन भगवन्तं नारदमुनिं संप्रार्थ्य तद्द्वारा कृतयुगादौ गजसृष्टिक्रमं, तद्वंशजनितगजेन्द्र-

प्रसारणादिक्रमम्, गजवननिर्देशक्रमम्, तद्रक्षणविधिम्, गजशिक्षाप्रकारादिकञ्च भूपालादिसर्वकार्यफलसिद्धये प्रवर्तयामासेति फलितोऽर्थ इति क्रमः।

I, १३-२८ हरिनाभीति। पुरा खलु देवासुरगन्धर्वादिसृष्टिरचनानन्तरं एकस्मिन् शुभसमये मनोहरं साम गायन् सन् चतुर्मुखः विधिः दिग्गजानष्टौ ससर्जेति कथाक्रमः। के ते इत्याकाङ्क्षायामुच्यते—सकलविधशुभलक्षणभासुरं ऐरावताख्यमुत्तमं गजं तदीयपत्न्या अभ्रमुनाम्न्या सहितं निर्मितवान्; एवं कपिलानाम्न्या हस्तिन्या समेतं पुण्डरीकगजम्; ताम्रकर्णिनाम्न्या हस्तिन्या समेतं पुष्पदन्ताख्यमिभाधिपम्; अङ्गनानाम्न्या हस्तिन्या समेतं वामनाख्यमुत्तमं गजम; अनुपमाख्यया हस्तिन्या समेतं सुप्रतीकगजम; पिङ्गळानाम्न्या हस्तिन्या समेतं कुमादाख्यमुत्तमं गजराजं च ससर्जेति सृष्टिक्रमः। सकलविधशुभलक्षणमण्डितास्त्वेते अष्टौ गजा विधातुराज्ञया देवानां प्रसादभूम्ना च दिग्गजाधिपत्यमवाप्य रेजुरित्यादि कथाविवरणं पुराणादौ विस्तरशो द्रष्टव्यम। एवं सम्मानितास्ते तु दिग्गजाः सर्वे विहगा इव नितरां दृढपक्षयुगळमण्डिताः स्वेच्छासंचारशीलाः तत्र तत्र स्वर्गपातालादिस्थानेषु सुखेन न्यवसन्। एवं कालक्रमेण तेभ्यः पञ्चोदरारिष्टप्रमुखाः दिग्गजतनयाः दिग्गजसमानाकृतयो जज्ञिरे। ततः कालेषु गतेषु तत्पुत्रप्रभृतयस्त्वसंख्येयाः सुतादयः समभूवन्। एवमुदिता दिग्गजसन्तानजनिता वारणाः सर्वे सकलविधशुभगुणसौशील्यादिशालिनः सन्तः देवासुरयुद्धादिसमयेषु तेषां वाहनत्वमप्यवाप्य तत्प्रसादादिकमासाद्य सुतरां रेजुः। अथापि तद्वंशजाताः केचित् द्विपेन्द्राः युगभेदेन कालक्रमेण च गर्वक्रोधभयराहित्यादिदुर्गुणजालपुञ्जिताः सन्तः गङ्गायमुनादिपुण्यतीरेषु कृताश्रमाणां ध्यानयोगतपश्चरणादिव्रासक्तानां मुनीनामुटजादिकं प्राप्य तद्वृक्षादीन् भङ्क्त्वा बहुप्रकारां पीडामुत्पादयामासुः। अनया रीत्या तत्कृतदुष्कार्योपद्रवादिकमसहिष्णवस्ते तु तपोधनाः अकालक्रुद्धाः सन्तः बहुविधैः शापप्रदानैस्तान् गजेन्द्रान् हीनशक्तीनकार्षुः। अत एव विगळितपक्षास्तादृशबलपराक्रमादिविहीना दन्तद्वयभासुराननाश्चासन्। तेषां तु दिग्गजानां तादृशमुनिशापपतनपर्यन्तमाननेषु दन्तचतुष्कप्राप्तिरित्याशयः। एवं शापादिना विगळिततेजोबलपराक्रमादयस्ते तु गजाः प्रायशस्त्यक्तदौर्जन्याः वसुन्धराभागमासाद्य काम्भोजाङ्गवङ्गनेपालकोसलकलिङ्गोत्कलादिदेशेषु मनोहरारण्यभूमिमासाद्य तत्र सकुटुम्बिनो विचरन्तीति पूर्वकथाक्रमकथनम्। एवमासृष्टि गजवृत्तान्तः कथित इति व्यवस्था। विस्तरेण गजवृत्तान्तादिकस्तु पालकाप्यकृतगजशास्त्रे वालखिल्यकृतगजचर्यायामन्येष्वपि पुराणेषु द्रष्टव्य इति तत्क्रमः। किंच तादृशा गजाः पूर्वं कृतयुगकाले भद्रजातिगजवंशसंभूता ह्यासन्। भद्रजातिगजलक्षणानि तु बहून्येव तादृशशुभलक्षणमण्डिता गजाः नितरामुत्तुङ्गाः गम्भीरवदनाः अप्रमेयबलपौरुषाः निर्भया असहायशूराः

सुतरां दीर्घशुण्डादण्डाः दीर्घवालधयः समरेषु भयङ्करेष्वपि क्ष्माभृतां विजयप्रदाश्च दृश्यन्ते। एवमनेकविधशुभगुणमण्डिताः वारणा एव त्रियुगे जाता इति क्रमः। तदनु त्रेतायुगकालेषु मन्दजातिगजवंशजनिता एवाविर्बभूवुरिति व्यवस्था। तादृशमन्दजातिगजास्तु नितरां स्थूलशरीराः स्थूलदन्ताः मन्दगतयः सन्तताहारप्रदत्ताशयाः कार्यकाले स्वल्पालस्यादिनिदर्शनशीलाः करिणीसम्भोगबद्धश्रद्धाः नाथवात्सल्यादिमण्डिताश्च भवन्तीति। एवं द्वापरयुगजनिता गजास्तु मृगजातिगजवंश्याः प्रायशः कृशशरीराः मृगयायुद्धद्युतमकार्येषु भीत्यालस्यादिनिदर्शनपराः सुलभकोपाः कृच्छ्रेण साध्यशिक्षाक्रमाश्चाभूवन्निति तद्व्यवस्था। अस्मिंस्तु कलौ युगे तत्र तत्र परिदृश्यमानाः सर्वे स्तम्बेरमास्तु प्रायशः संकीर्णजातिजा एव। पूर्वोक्तभद्रमन्दमृगाख्यगजत्रयलक्षणवन्तः संकीर्णगजा इति व्यवह्रियन्ते सद्भिरिति। तथापि कलियुगगजा एते संकीर्णवंशजाता अपि देशागतमानां प्रसादभूम्ना सूक्ष्मधोभृतः बलिष्ठाः सकलकार्यनिर्वहणशक्तिभासुराः तत्र तत्र देशेषु सत्यधर्मशीलानां भूभृतां जयप्रदाश्च विजयन्त इति कथासंक्षेपः॥

इति गजशिक्षायां व्यक्तिटिप्पण्यां गजसृष्टिक्रमकथनात्मकः

प्रथमः पटलः

---

## अथ द्वितीयः पटलः

II, १-५ तेषूत्तमा इति। एवमुक्तप्रकारेण गजसृष्टिक्रमकथनात्मकं प्रथमं पटलमुपदिश्यानन्तरं भगवान् नारदः शिष्यवर्गोपकृतये इंद्रांशाद्युत्तमगजलक्षणक्रममुपदिशतीति पटलसन्दर्भार्थक्रमो ज्ञेयः। तत्र भगवता ब्रह्मणा सृष्टेषु गजेषु कलौ युगेऽप्येतस्मिन् भूलोके इन्द्रांशेनावतीर्णाः केचिद् गजाः तत्र तत्र संचारमातन्वते बहुषु वनभूमिभागेषु कथं ते इन्द्रांशावतीर्णा वारणा ज्ञेया इति चेत् तल्लक्षणं कथयति भगवान् नारदः—मनोहरतनुरित्यादिना। मनोहरतनुरित्यादिकः पाठः स्पष्टार्थ एव। तथापि विशेषार्थव्यक्तिमुपदिशामि। यथा—वासव इव नितरां काम्यशरीरः सर्वगजापेक्षया तुङ्गः भृशवेगगमनः संपूर्णपौरुषश्च यो यो गजः परिदृश्यते, स गजः इन्द्रांशगज इति ज्ञेयः। किंच तादृशा गजाः सर्वेऽपि अकलङ्कशरीराः कमनीयनयनाः युद्धादिसमयेषु भूपालादीनां शत्रुसेनादीन् भङ्क्त्वा स्वामिनां विजयप्रदाश्च विजयन्ते। शेषं स्पष्टम्॥

II, ६-८ अथ क्रमप्राप्तस्य द्वितीयस्य अग्न्यंशगजस्य लक्षणमुपपादयति भगवानाचार्यो नारदः—अन्येत्वित्यादिना । केचित्तु वारणाः जननकालमारभ्य अग्निदेववदमेयबलपौरुषाः नितरामारक्तनेत्राञ्चला युद्धेषु रिपुबलान्यग्निदेववत् दग्ध्वा स्वामिनां नित्यसंपद्वृध्यादिकमाकलयन्ति । किंचैते सजलजलदपटलकान्तिकाम्यनीलशरीरा अपि वह्निज्वालाङ्कुरवदारक्तरोमावलिभासुराश्च परिदृश्यन्ते । एवमेवारक्तदन्तद्वयाः रक्तवर्णानेकबिन्दुमण्डिताननना वा रक्तवर्णपादनखोपेता वा तदुभयलक्षणपरिमण्डिता वा समालक्ष्यन्ते ; ते सर्वे शुद्धशरीराः स्वामिनां मंगलदायिन इति । स्पष्टार्थः शेषः ॥

II, ९-१० अथ तृतीयस्य यमांशगजस्य उत्तमस्य लक्षणं व्यक्तीकरोति—यमांशा इत्यादिना । यमदेववत् नितरां नीलशरीराः मृगयायुद्धसमयादिष्वत्यन्तं भयंकरझींकारगतिचर्यादिप्रदर्शिनः नितरामायतदन्तयुगळाः कोपादिवेलासु अमेयाप्रधर्ष्यवेगगतयः संततं सत्कार्याद्याचरणतत्पराः धीमन्तश्च ये ये गजा दृश्यन्ते ते सर्वेऽपि यमांशाः । परेषां प्राणिनां मनुष्याणां वा बाधाचरणादिदुष्टकार्यविमुखाश्च निगद्यन्ते इति । शेषं स्पष्टम् ॥

II, ११-१३ अथ चतुर्थस्य वरुणांशगजस्य लक्षणमाह—जलेशांशा इत्यादिना । ये ये गजाः संततजलक्रीडाद्यासक्तिभासुराः संपूर्णयौवनकालेषु कर्णयोर्गण्डयोर्मस्तकतले शुण्डाग्रे च नितरां मदजलस्राविणः सततं शीतलस्थलवासलालसमानसाः राजन्ते ते सर्वेऽपि वरुणांशगजा इति मुनीन्द्रैर्निर्दिष्टाः । एतादृशवारणाः सर्वेऽपि नगरे राष्ट्रे स्वनायकसदने च नानाविधमङ्गळप्रदायिनो भवन्ति स्वकीयांशदेवप्रसादभूम्नेति व्यक्तिः । एतादृशगजाश्चोत्तमाः संमान्या इति । शेषं स्पष्टम् ॥

II, १४-१६ अथ पञ्चमस्य पवमानांशभासुरगजस्य उत्तमस्य लक्षणान्युपपादयति—अनिर्वार्येत्यादिना । ये ये हस्तिनः युद्धादिसमयेषु प्रेरिताः सन्तः शरवेगवत् मनसा वाचा चानिर्वार्यवेगपादाः परबलदन्तिभटादिभिरप्रधृष्यपौरुषाः मल्लीकुसुमस्येव वा केतककुसुमस्येव [वा] पाटलकुसुमस्येव [वा] पुन्नागकुसमस्येव वा शिरीषकुसुमस्येव वा मनोहरगन्धवीजनमण्डितशरीराः वसन्तादिकुसुमसमयेषु मल्लिकादिलताकुसुमदर्शनलोलचित्ताश्च लक्ष्यन्ते । ते सर्वेऽपि पवमानांशभासुराः सर्वेषां मङ्गलदायिनो भवन्तीति । किंच एते गजाः आलानेषु बद्धाः सन्तः मुहुर्मुहुरितस्ततः स्वशरीरचलनं स्वशुण्डादण्डचलनं च कुर्वन्ति । एतादृशव्यक्तकारणैश्च ते पवमानांशगजा विज्ञेया इति । लक्षणान्तराणि स्पष्टार्थान्येवेति ॥

II, १७-१९ अथ षष्ठस्य कुबेरांशगजस्य लक्षणं वदति—ते दन्तादिना। पुण्डरीककुमुदलवत् मनोहरश्वेतकान्तिमण्डितदन्ताः नीलमेघवन्मनोज्ञकान्तिपटलच्छुरिताङ्गाः आलानबन्धनसमयेषु लीलागमनसमयेष्वन्येष्वपि नितरां गम्भीरदर्शनाः गम्भीरप्रकृतयः शरीरासनादिचाञ्चल्यरहिताश्च ये ये गजा विलोक्यन्ते, ते सर्वेऽपि कुबेरांशमण्डिता इति तत्त्वज्ञा मुनयो वदन्तीति। किंच एते द्विपाः निजपार्श्वयोः पुरतःस्थले समीपस्थाने वा यदि कदाचित् करिणीनां यौवनमण्डिताङ्गानां समागमनदर्शनादिकं संजातं तदा एते कुबेरांशगजाः तल्लालनतत्संभोगादिविविधशृंगारलीलाप्रेरितमानसाः क्षणं दृश्यन्ते। तथाप्याधोरणादिनियोगस्थिताः स्वकार्यादिषु बद्धश्रद्धाः तन्द्रालस्यादिवर्जिता जितकामक्रोधक्षमादयः सर्वजनश्लाघनास्पदे वर्तन्त इति विशेषगुणव्यक्तीकरणक्रमः। किंच एते कुबेरांशगजाः सर्वेऽपि भूमौ पतनशीलसुदीर्घदृढमनोहरशुण्डादण्डाः दीर्घवालाश्च परिदृश्यन्ते। एतादृशवारणेन्द्रांशमाहिम्ना तत्र निवासभाजां जनानामन्यगजानां च विशेषतः क्षेमाद्यभिवृद्धिरिति लक्षणवाक्यार्थः॥

II, २०-२३ अथ सप्तमस्य शंकरांशगजस्य लक्षणमाह—त्रिवल्य इत्यादिना। येषां गजानां मुखमध्यभागेषु, वक्षस्स्थानेषु, उभयत्र वा रेखात्रयरूपाः त्रिवल्यः आजन्म परिदृश्यन्ते, ते सर्वे रुद्रांशगजा ज्ञेया इति गजशास्त्रविदः। किंच पूर्वोक्तरीत्या मुखमध्यभागे वा पुष्कराग्रतले वा उभयत्र वा वर्णद्वयमेळनं वा वर्णद्वयबिन्दुलक्ष्म वा येषां गजानामाजन्म परिदृश्यते ते सर्वेऽपि शंकरांशाः स्वस्वामिनां सन्ततमङ्गलप्रदा इति। किंच एतेषां शंकरांशगजानां नितरामुत्तुङ्गदीर्घशरीरत्वं, मृगयायुद्धादिश्लाघ्यकार्येष्वप्रमत्तत्वं, कोपकाले रुद्रवद् भीकराकृतित्वं, महावेगप्रचण्डपराक्रमप्राप्तिश्च आजन्मसिद्धानीति क्रमः। किंच येषां द्विपानां महाधैर्यभाजां शरीरमनोहरधूसरच्छायाप्रसारमवलोक्यते, तांश्च रुद्रांशान् शुभप्रदान् कीर्तयन्ति। विच्छायधूसरवर्णप्राप्तिस्त्वशुभप्रदा। अत्रोक्तमनोहरधूसरवर्णप्राप्तिस्तु गजानां नाथादीनां च मङ्गळप्रदेति। स्पष्टमन्यत्॥

II, २४-२७ अथाष्टमस्य यक्षांशगजस्य लक्षणमुपपादयति—यक्षांशा इत्यादिना। ये ये गजा नितरां मनोहराननाः सन्ततं शान्तस्वभावाः प्राणिभिस्सहावासलालनाद्यासक्ताः मुखपटकम्बलपट्टवस्त्रघण्टाकिङ्किणीप्रमुखगजालंकारसामग्रीधारणासक्ताः मृगयाक्रान्तचित्ताः आबाल्यान्मिताहाराः जलक्रीडासु नित्यस्नानादिषु बद्धप्रेमाणः नितरां बुद्धिमन्तः अत एव एकवारद्विवारसाध्यशिक्षापाठक्रमकार्याः विलोक्यन्ते, एतादृशलक्षणान्वितास्ते सर्वेऽपि

हस्तिनः यक्षांशभासुरा इति विज्ञेयाः। किंच यक्षेशादिवत् सन्ततं सुगन्धमनोहर-शीतलस्थलगामासक्ताः गन्धर्वांशत्वात् यौवनोदयेषु वशासंभोगलालसा अपि स्वक्रियास्वप्रमत्ताः नेतुराज्ञावर्तिनश्च एते दशगजाः राष्ट्रस्याभिवृद्ध्यर्थं ब्रह्मणा सृष्टा इति। स्पष्टमन्यत् ॥

II, १८-३० अथ नवमस्य गन्धर्वांशगजस्य लक्षणं स्पष्टीकरोति—वारणा इत्यादिना। ये ये गजाः शिक्षाकालेषु मृगयादिविविधकार्यसमयेष्वपि स्वभावसिद्धं स्वरमालस्यादिकं बहिः प्रकटयन्ति, एवं ये ये वारणाः मितबलपौरुषाः गन्धर्ववत् अत्यन्तं मनोहराङ्गाः सङ्गीतश्रवणासक्तिभाजः, नातिकठिनत्वचः, मञ्जुलदन्तकोशा मन्दगतयश्च विलोक्यन्ते, गन्धर्ववत् वसन्तादिसमयेषु मनोहरेषु नानाविधलीलासक्ताश्च भवन्ति, ते सर्वेऽपि गन्धर्वांशगजाः युद्धादिसाहसकार्येष्वशक्ताश्च भवन्तीति लक्षणार्थः। स्पष्टमन्यत् ॥

II, ३१-३३ अथ दशमस्य किन्नरांशगजस्य लक्षणमुपपादयति—पद्मिन इत्यादिना। येषां गजानामवयवेषु विकसितकमलवत् मनोहरगन्धवीजनप्रसक्तिरुपलक्ष्यते; एवं ये ये गजाः मनोहरलोचनाः गन्धर्वा इव निजकरिणीभिस्साकमनवरतसंचारलीलाद्यासक्तिभाजः प्रायशश्शान्तचित्ताः सुमेधसः आधोरणादिप्रयुक्तनानाविधसान्त्ववाक्यश्रवणादराः गन्धर्वा इव मञ्जुगतयः वेगगमनवेळास्वपि स्वमस्तकस्थानादिस्थापितासनादीनामचाञ्चल्यप्रदाः पट्टाभिषेकपरिणयादिसमयेषु नानाविधेषु नगरवीथीग्रामवीथ्यादिस्थलेषु सञ्चाराद्यासक्तमानसाः चन्द्रिकादिषु स्वेच्छाविहारासक्ताश्च दृश्यन्ते, एवं ये ये वारणाः शुद्धदेहाः, शुभलक्षणाः सन्ततमाधोरणाद्याज्ञावशवर्तिनः तत्प्रयुक्तकार्येषु बद्धभावाः प्रायशः ह्रस्वाकृतयो ह्रस्वमनोहरदन्ताश्च भवन्ति, ते सर्वेऽपि किन्नरांशगजाः मानवानां विविधशुभवर्धकाश्च राजन्त इति। स्पष्टमन्यत् ॥

II, ३४-३७ अथैकादशस्य विष्ण्वंशभासुरगजस्य लक्षणानि निरूपयति—विष्ण्वंशराजिता इत्यादिना। कैर्वा शुभलक्षणैः विष्ण्वंशगजा ज्ञेया इत्याकांक्षायां तानि क्रमेण व्यनक्तीति व्यवस्था। येषां गजानां प्राप्त्यनन्तरं अथवा जननानन्तरं यजमानस्य आधोरणादीनां च कुटुम्बे विजयारोग्यादिसंपत्प्रसक्तिः उपलक्ष्यते, येषां गजानां मुखमध्यभागे वा पुष्कराग्रे सव्यभागोदरतले वा दक्षिणभागोदरतले रक्तरेखाकारं शंखस्य चिह्नं वा चक्रस्य अथवा कमलस्य चापस्य वा रूपमुपलक्ष्यते व्यक्तम्; ते सर्वे गजाः विष्ण्वंशभासुराः अधिकमूल्यार्हाश्च भवन्तीति भावः। किंच ये ये गजाः सुतरां स्थूलदृढदन्ताः उन्नतकायाः सन्ततं प्रशान्तमानसाः मृगयायुद्धादिदुस्साध्यकार्येषु अपि अप्रमत्ताः

जयशालिनः नितरां आयतशुण्डादण्डाश्च भवन्ति, तांश्च सर्वान् विष्ण्वंशगजानामनन्ति गजशास्त्रविदः। एवमेव येषां गजानामाननमध्यभागे वा कर्णरन्ध्रसमीपस्थले उभयत्र वा स्थाने आढकप्रमाणरक्तवर्णबिन्दूनां अनेकेषां स्थितिरुपलक्ष्यते ; ये ये गजाः गजवृन्देषु स्वयमेव पुरोगमनार्थं उद्युक्ताः बहुभिरन्यप्रकारैः शुभलक्षणैः मण्डिताश्च लसन्ते ; चिरकालायुषः विविधमंगलप्रदातारस्ते च सर्वे विष्ण्वंशगजा इति तल्लक्षणार्थक्रमः । स्पष्टमन्यत् ॥

II, ३८-४१. अथ द्वादशस्य ब्रह्मांशगजस्य लक्षणमाह—वाणीशांशसमुद्भूता इत्यादिना । ये तु गजाः वेदपाठपठनशीलस्य विधातुरिव मनोहररींकारध्वनिकारिणः, ये तु गजाः अनायासेन सकलविधशिक्षाक्रमग्रहणशीलाः सुमेधसः स्खालित्यादिरहितनिजकार्यप्रदर्शनादिना आधोरणानां स्वामिनां अन्येषां च प्रीतिश्लाघनास्पदाश्च विद्योतन्ते, ते च गजाः ब्रह्मांशद्विपा इति निगद्यन्ते । किंच ये ये गजाः परागपङ्कावस्करादिमालिन्यादिरहितमञ्जुलशरीराः स्थूलोदराः आरक्तरेखावलीभासुरनयनप्रान्ताः सन्ततं चालितशुण्डादण्डाः वर्षाकाले वसन्तकाले नितरां शरीरपुष्टिभाजस्ते विलोक्यन्ते ते च ब्रह्मांशगजा ज्ञेया इति । किंच मिताहाराः मितनिद्राः सर्वविधकठिनकार्यसमयेऽपि अश्रान्ताः ते तु गजाः प्रायेण मुखभागे रेखया आरक्तयांचिताः रक्तवर्णभासुरनक्षत्राकारलक्ष्माणो वा भवन्ति। एतादृशा ब्रह्मांशगजाः सर्वेषामपि जनानां क्षेमदाश्च भासन्त इति । स्पष्टमन्यत् ॥

II, ४२-४४. अथ त्रयोदशस्य चन्द्रांशगजस्य लक्षणमुपपादयति—चन्द्रांशा इत्यादिना । ये ये गजाः चन्द्रमण्डलवत् मनोहरश्वेतवर्णच्छुरितसर्वावयवाः अभिनवललिताहारभक्षणदत्तचित्ताः सन्ततशीतलाङ्गाः प्रशान्तमनस्काः सकलविधक्रियादक्षाश्च विलोक्यन्ते, ते सर्वे चन्द्रांशभासुरगजा विज्ञेया इत्येकः पक्षः । पक्षान्तरे तु कलौ युगे जनिता गजास्सर्वेऽपि प्रायशः कृष्णवर्णावयवा नीलवर्णावयवाश्च विलोक्यन्ते। तादृशश्वेतवर्णछुरितांगाः गजा मृग्या एवेति तन्मतेऽपि केषांचित् गजानां कृष्णवर्णच्छुरिताङ्गानां मुखमध्यभागे नक्षत्राकाराणां कतिपयानां श्वेतवर्णबिन्दूनां स्थितिः विलोक्यते । एवमेवान्येषां केषांचित् गजानां कृष्णवर्णानां मुखमध्यभागे श्वेतवर्णमण्डलं वा दृश्यते। एवं प्रकारद्वयलक्ष्यभासुरास्सर्वेऽपि गजाः चन्द्रांशा विज्ञेया इति क्रमार्थः बोध्यः । अपि च एते द्विपाः सुलभशिक्षाक्रमाः सुमेधसः इङ्गितज्ञाः सर्वकार्यसमर्थाश्च भासन्ते। यौवनमदाद्यभिवृद्धिसमयेषु करिणीसंभोगादिरक्ता अप्येते गजाः निजकार्येष्वप्रमत्ताः नेतुः आज्ञापरिपालनादराः कुटुम्बादिषु शुभवृद्धिकराश्च राजन्तीति । शेषं स्पष्टम् ॥

II, ४५-४८. अथ चतुर्दशस्य तापसगजस्य लक्षणान्यपि क्रमेणाविष्करोति— ते तापसांशा इत्यादिना। ये ये वारणाः वनभूमिभागेषु सन्ततनिवासाय बद्धादराः तत्राप्येकान्तस्थलनिवासपराः सुतरां शान्तचित्ताः प्रायशो निमीलिताक्षाः योगध्यानादिष्विव सुखशयनबद्धादराः क्षुत्पिपासादिश्रमसहिष्णवः विजितकामक्रोधलोभादिकार्याश्च तत्र परिदृश्यन्ते, ते सर्वे गजाः मुन्यंशभासुराः विज्ञेया इति तत्क्रमः। किंच ये ये द्विपाः नाथनिर्दिष्टेषु सर्वविधकार्येष्वपि अप्रमत्ताः तन्निर्वहणशक्तिशालिनः प्रत्यहं त्रिकालस्नानदत्ताशयाः युद्धादिषु प्रचण्डाः शिक्षादिवेळासु मुनीश्वरा इव संमाननीयधिषणाभृतः शिक्षितपाठविस्मृत्यादिदुर्लक्षणदूरगाश्च विलोक्यन्ते, ते चापि मुन्यंशगजा विज्ञेया इति। सर्वविधशुभगुणमण्डिताः एतादृशाः तापसांशगजाः सर्वेऽपि दण्डनानर्हा एव कीर्तिताः। अत एव नृपालादिमाननार्हा एवेति संग्रहेण तदर्थक्रमः॥

II, ४९-५२. 'अष्टाभिः लोकपालानां मात्राभिर्निर्मितो नृप' इत्यादि पुराणवचनानुसारेण कलियुगेप्यस्मिन् भूलोके केचित् पार्थिवाः तादृशलोकपालांशभासुराः सत्यसंधाश्च परिदृश्यन्ते। अत एव तादृशभूपालांशमण्डिताः केचित् वारणाः तत्र तत्र देशेषु जनिमवाप्य जनानां भूयसे श्रेयसे प्रभवन्तीति तत्क्रमः। तस्मात् तादृशभूपालांशगजाः कथं ज्ञेया इत्याकांक्षायां आह—लोकपालांशसंभूता इत्यादिना। ये ये गजाः महीश्वरा इव मञ्जुळरीकाराः मनोहरमसृणदीर्घदन्तयुगलाः तमालपर्णमनोहरनीलकान्तिच्छुरितसर्वावयवाः आरक्तास्यभागाः कतिपयरक्तवर्णबिन्दुजालमण्डितमुखमध्यभागाः अप्रमेयबलाः पृथुमस्तककुम्भयुगळाः आयतवालदण्डाः कम्बलपट्टवस्त्रादिनिन्यालङ्कारमण्डनेष्वासक्तचित्ताः प्राणिहितकराः यौवनकालेषु समुचितसमयादिष्वपि करिणीगर्भगमनशीलाः अपि मङ्गळास्पदत्वात् राजवाहनयोग्याश्च भवन्ति, तेषामेते विशेषशुभदायिन इति भावः। किंच एवमेव मल्लिमालाधरणरीत्या श्वेतवर्णनानाबिन्दुमण्डितमुखभागाश्च द्विपा विलोक्यन्ते, तेऽपि पार्थिवांशगजा इति तत्क्रमः। एतादृशगजा बहुमूल्या इति निष्कृष्टार्थः॥

II, ५३-५८. अथ षोडशस्य मानुषांशगजस्य लक्षणादिकं व्यनक्ति—उत्तमा इत्यादिना। सत्कुलजनिताः तैस्तैः शुभगुणकार्यादिभिः ये ये नराः उत्तमा लोके तत्र तत्र दृश्यन्ते; तादृशमनुष्यांशसंभूताः कतिपयवारणाश्च तत्र तत्र अङ्गवङ्गादिदेशे गजशालासु कुञ्जेषु विविधेषु महारण्यतलेष्वपि प्राप्तवासाः परिदृश्यन्ते। अत एव तेऽपि वारणाः सर्वकार्यार्थसिद्धये भूपालादिभिः स्वीकार्याः संरक्षणीयाश्च इत्युपदेशक्रमव्यवस्था। तेषां परिदृश्यलक्षणक्रमे यथा मानुषांशगजाः सर्वेऽपि प्रायशो ह्रस्वप्रमाणाः ह्रस्वदन्तयुगळाः

मानुषैस्साकं बहुविधखेलनासक्ताः स्वखेलनादीन् तेभ्यः सन्ततं प्रदर्शयितुमुद्युक्ताः मानुषान्नपायसभक्ष्यलेह्यादिभोजनद्रव्येषु निबद्धाशयाः तद्भक्षणशीलाः शिक्षादिकालेषु निजधिषणासामर्थ्यप्रदर्शकाः उग्रातपवेळादिसमयेषु प्रायशः परिश्रान्तदेहाः शश्वत् चालित-कर्णतालाश्च विलोक्यन्ते। एतेपि वारणाः सुरक्षिताः संमानिताश्च पुंसां बहुविध-श्रेयस्करा भवन्तीति लक्षणवाक्यार्थः। एवंरीत्या षोडशविधानां उत्तमकुलजनितानां शुभतरलक्षणभासुराणां वारणानां लक्षणानि व्यक्तं प्रदर्शितानि महर्षिणा नारदेन। अनयैव रीत्या मध्यमकुलजनिताश्च कतिपयगजाः तत्र तत्र राजन्ते। अत एव तेषामपि लक्षणान्युच्यन्त इति क्रमव्यवस्था॥

II, ५९-६२ पितामहांशा इति। तत्र तत्र काननकुञ्जादिस्थलेषु जनितेषु वारणेषु केचित् गजाः पित्रंशाः पितामहांशाश्च विलोक्यन्ते। ते सर्वेषु मध्यमांशा विज्ञेया इति। किंच ते सर्वे पित्रंशवारणा प्रायेण मन्दगमनाः अरम्यरीङ्कारा वा गद्गदस्वरमिलित-कण्ठरवाः कार्यादिप्रसक्तौ स्वकीयनिद्रालस्यादिप्रदर्शकाश्च दृश्यन्ते। किंच ते सर्वे प्रचण्डा-तपवातवर्षाद्यसहिष्णवः शश्वत् तृष्णाश्रमादिपीडिताः बहुकोपाः सुलभकोपाः भुजगवत् शश्वत् निःश्वासं फूत्कारसन्निभं उद्गिरन्तश्च परिदृश्यन्ते। अपि च प्रतिमुहूर्तं पङ्कपरा-गादिप्रक्षेपणान्नितरां मलिनधूसरशरीराः कृशोदराः यौवनोदये मदजलप्रसारादि-रहिताः पितृवत् एकान्तस्थलनिवासादराः अत एव गजबृन्दमध्यवासासहिष्णवश्च। किंच केचिद् द्विपाः अकालव्याधिपीडिताश्च। अत एते सर्वेऽपि शुभादिकार्येषु दूरत-स्त्याज्या इति भावः॥

II, ६३-६६ अथ अष्टादशस्य क्रमप्राप्तस्य विहगांशगजस्य लक्षणमाह— शकुन्तांशा इत्यादिना। ये ये गजाः आजन्म नितरां दुर्बलाः पिपासया क्षुदाधिक्येन सन्ततं परिग्लापितमानसाः अत एव निकटस्थान् गजानन्यांश्च प्राणिनो निरीक्ष्य कलह-कार्याचरणादिषु बद्धाशयाः तादृशकार्याचरणादिना च परिश्रान्ताः भारवहनादिकार्य-समयेषु भयकंपितशरीराः नितरां कृशाङ्गाः सन्ततं दुर्गन्धबहुमूत्राश्च विलोक्यन्ते, ते सर्वे पक्ष्यंशाः गजाः ज्ञेयाः। किंच ये ये गजाः निजकर्णताळचालनध्वनिभिः शृङ्खलाधर्षणचालनादिध्वनिभिः अरम्यरींकारनिनदैश्च निजपारा(स्वा)तन्त्र्यादिराहित्यसंजातां मनःपीडां शश्वदावेदयन्तश्च निवसन्ति ते च मध्यमाः गजाः ज्ञेयाः इति॥

II, ६७-६९ अथैकोनविंशतितमस्य मत्स्यांशगजस्य लक्षणं व्यनक्ति—जायन्त इत्यादिना। वङ्गकलिंगादिदेशेषु तत्र तत्र वनभूमौ नगरग्रामादिस्थानेषु गजबृन्देषु केचित्

गजाः मत्स्यांशजाताः परिदृश्यन्ते; ते सर्वेऽपि प्रायेणाल्पाशयाः सत्कार्यादिष्वनर्हाः अत एव त्याज्या इत्युपदेशक्रमो ज्ञेयः। कीदृशैश्चिह्नैस्ते तु विज्ञेया इति चेदुच्यते। यथा—येये (एते) गजाः स्वभावादेव अल्पाशयाः निबिडरोमावलीकबलितधूसरच्छायाकृशशरीराः अत्यन्तं जलपानरताः मिताहाराश्च दृश्यन्ते। किंच ते सर्वेऽपि प्रायशः समयेषु केषुचित् निजवक्रगतिवक्रध्वनिप्रदर्शनादिना समीपतलसञ्चारभाजां प्राणिनामकालभयप्रदाश्च। एवं ते प्रायशः कपटस्वभावाः मत्स्यवत् शश्वत् चलितनिजनेत्राः शिक्षणादिकार्यकालेषु आधोरणादीनां दुस्साध्याः दुर्मेधसः विद्याग्रहणादिकर्मसु अशक्ताश्च विलोक्यन्ते। किंच कृच्छ्रेण प्रकल्पितशिक्षाक्रमा अपि स्वकीयाल्पबुद्धिप्रदर्शनादिना तादृशकार्यादीनां अल्पफलदाश्च परिदृश्यन्ते। अत एतादृशाः सर्वेऽपि वारणाः परिहर्तव्या इति व्यवस्था॥

II, ७०-७१ अथ विंशतितमस्य लतांशगजस्य लक्षणं स्पष्टीकरोति। चलच्छीर्षा इत्यादिना। ज्वरादिव्याधिभिरपीडिता अपि ये ये गजाः स्वभावत एव शश्वत् प्रकम्पितशीर्षाः तथैव विचलितनेत्राः भ्रमन्नयनाः प्रयत्ने कृतेऽपि हस्तिपकादिप्रयुक्तशिक्षादिकार्येषु स्ववैमनस्यदुःखासामर्थ्यादीन् बहिः प्रकटयन्ति; तादृशशिक्षाविमुखाश्च भवन्ति; एतादृशगजा लतांशा विज्ञेया इति क्रमः। अपि च एते लतांशगजाः सर्वेऽपि प्रायशो दुर्बलाः मूढात्मानश्च भवन्ति। यदा कदाचित् महता प्रयासेन शिक्षादिकार्येषूपदिष्टेषु सत्स्वपि तत् सर्वमपि क्षणकालेनैव विस्मरन्ति मूढस्वभावत्वात्। अत एव क्रयादिना स्वीकरणानर्हा एते इति मतिः। किंच ये ये गजाः प्रायेणाल्पायुषः भस्मवर्णच्छुरिताङ्गाश्च दृश्यन्ते तेऽपि त्याज्या एवेति॥

II, ७२-७४ अथैकविंशतितमस्य कुसुमांशगजस्य लक्षणमाह—सुमांशा इत्यादिना। तत्र तत्रारण्यभागादिषु प्राप्तसंचारेषु गजबृन्देषु केचित् गजाः कुसुमांशसमुज्ज्वला भवन्ति। ते तु मध्यमा एव न श्लाघ्याः। कुतः? ये ये गजाः मल्लीवकुळकमलचम्पकाशोकादिविविधपुष्पमालाद्यलंकारधरणेषु नितरां बद्धाशयाः तादृशकुसुमलतादिविलोकनैकपरायणाः स्वकार्यादीन् प्रत्यालस्यग्रस्ताश्च भवन्ति; एवं ये ये गजाः शिक्षणादिषु अल्पाशा एव भवन्ति अल्पकार्याण्येव साधयन्ति च; ये ये हस्तिनः पुष्पगन्धवीजनमनोहराङ्गा अपि नितरां क्षीणबलाः स्वस्थानेष्वेव सुखवासतत्पराः आतपवेळादिषु कार्यादिष्वशक्ताश्च भवन्ति; अपि च अनेनैव प्रकारेण ये च गजाः हरिणधेन्वादिप्राणिषु विश्वासशालिनोऽपि मन्दगतयः मन्दरींकाराश्च दृश्यन्ते; एते च कुसुमांशाः सुखवासार्हा एवेति। स्पष्टमन्यत्॥

II, ७५-७८ अथ द्वाविंशतितमस्य धेन्वंशगजस्य लक्षणं विशदयति—धेन्वंश' इत्यादिना। नानानगरगजशालास्वरण्यवीथीष्वपि संचरतां करिणां वृन्देषु कतिपयगजा धेन्वंशभासुराः केचित् शुभलक्षणैरन्यैश्च दुर्गुणादिभिः दुर्लक्षणैश्चोपेताः दृश्यन्ते। ते तु धेन्वंशा विज्ञेया इति तद्व्यवस्था बोध्या। तद्विवृतिर्यथा—ये ये गजा अरम्यस्वरूपदीर्घदन्तयुगळाः धेनुवत् निबिडरोमावळीकवचितदीर्घवालाः नितरां कृशांगाः धेनोरिव स्थूलाकारनेत्राभ्यां विकृताननभागाः सुमेधसः प्रशान्तात्मानोऽपि मन्दगतयः क्षीणशौर्यादयश्च दृश्यन्ते। अपि च ये ये गजाः नितरां भक्षणासक्ताः कार्यकालेषु संप्राप्तालस्यशाठ्यादयः शिक्षिता अप्यसद्वृत्तयः विलोक्यन्ते। एतादृश-गजाः सर्वेऽपि शुभकार्यादिषु दूरतस्त्याज्या एवेति। एवंरीत्या षड्विधमध्यमांश-गजानां लक्षणान्युक्तानि। तैस्तैश्च लक्षणैरन्यैश्च प्रकरणोचितैः ऊहादिभिः चिर-परिचयादिभिश्च तत्तद्गजांशा विज्ञेया महीपालाधोरणादिभिरिति व्यवस्था। किंच प्रथमतः प्रतिपादिताः षोडशविधांशभासुराः सर्वेऽपि वारणाः नितरामुत्तमाः उत्तमोत्तमाश्च बहुमूल्याहाः स्वीकार्याः प्रयत्नादिभिः सर्वविधश्रेयःप्राप्त्यर्थमिति तत्क्रमः। एतैस्तु षट्प्रकारैः मध्यमांशगजैः नृपत्यादीनां विशेषतो न लाभप्रसक्तिः नाप्यनर्थश्च। अत एव सुखवासार्हा एते संरक्ष्या यदीच्छायामि(स्यादि)ति। किंच अनयैव रीत्या षड्विधमधमांशहस्तिनां कुलमपि निर्दिष्टम्। तल्लक्षणं च क्रमात् प्रतिपाद्यत इति बोध्या व्यवस्था॥

II, ७९-८५ पूर्वप्रतिज्ञातमधमगजानां केषांचित् लक्षणं व्यवर्तीकरोति —स्वदोषादित्यादिना। दिग्गजवंशसंभूतेषु बहुविधशुभलक्षणशुभगुणभासुरेषु शत-सहस्रसंख्याकेषु गजेषु केचित् गजाः कालक्रमेण मतिमौढ्यभाजस्सन्तः निरपराधाना ध्यानाद्यासक्तानां मुनीन्द्राणामुटजादिकं क्षोभयित्वा निजबलदर्पादिना तांश्च ताडयित्वा तेषां शापादिकमप्यवाप्य विगळितसल्लक्षणाः क्रूरस्वभावाः दुर्धर्षाश्चाभूवन्निति पूर्व-कथाप्रसङ्गः। एवंरीत्या तादृशशुभलक्षणदिग्गजवंशजनिताः गजाः केचित् अधमलक्षण-कचलिताः राक्षसांशाः समभूवन्। यथा राक्षसानां (क्रूर)गुणादयः तादृशदुर्गुण-सञ्छादिता आसन्निति। एवमुत्तरत्रापि। किंच परे तु गजाः असुरांशा अन्ये पिशाचांशाः इतरे सिंहांशाः केचित् शार्दूलांशाः केचिन्मर्कटांशाश्च तत्र तत्र परिदृश्यन्ते एते सर्वेऽप्यधमाः दुराराध्या दूरतस्त्याज्या नृपादिभिरिति तत्क्रमः। तेषां अधमगजानां षड्विधानां लक्षणानि यथा—तत्र तत्र काननकुञ्जादिषु पुरपत्तनादिष्वपि जनितेषु गजेषु ये ये वारणाः नितरां दृढस्थूलशुण्डादण्डपादाः रक्तवर्णभीकरनेत्राश्च उत्तुङ्गशरीराः

मस्तकघट्टनपादताडनशुण्डाप्रसारताडनादिविविधदुष्कार्याचरणासक्ताः दृश्यन्ते ते राक्षसांशगजा विज्ञेया इति निर्देशव्यवस्था । किंच एतादृशाः राक्षसांशवारणास्सर्वेऽपि समीपतलवर्तिनां प्राणिनां पश्वादीनां मनुष्याणां विनैव कारणानि वधं कुर्वन्ति । अथवा ताडयन्ति भर्त्सयन्ति कठोररींकाररवैः निशाचरादिवदिति एतादृशराक्षसांशगजानां दर्पसमये वेगगमनादिकं सर्वथा निरोद्धुं न प्रभवन्त्येव । हस्तिपकप्रतिभटवारणादयश्चेति । किंच ये ये वारणाः प्रायशो निशासु त्रुटितबन्धनशृंखलादयः स्वेच्छाविहारसंचारसक्ताः प्रचण्डपराक्रमाः मांसादिदुर्भक्ष्यनिरीक्षणादितत्पराः शिक्षणादिसमयेषु आधोरणादिप्रयुक्तसान्त्ववाक्यशिक्षावाक्यश्रवणादिविमुखाश्च भवन्ति किंच ए(ते) राक्षसांशगजाः क्रुद्धास्सन्तः स्वयन्तॄनपि हिंसादिना भीतान् कुर्वन्ति । घ्नन्ति च केचित् । एवमेते गजाः राक्षसा इव क्रूराशयाः मदिरापानादिलोलुपाः अमेयबलपराक्रमाः कपटक्रियाः दुर्गुणैरन्यैरनेकैः आवृतात्मानश्च विलोक्यन्ते । अत एते शुभेप्सुभिः वर्ज्या इति ॥

II, ८६-८८ अथ चतुर्विंशतितमस्य असुरांशगजस्य लक्षणमाह—महाकाया इत्यादिना । ये तु वारणाः स्वभावादेव नितरामुत्तुङ्गशरीराः नितरां स्थूलदन्ताः भर्त्सनताडनवधादिदुष्टकार्याचरणेषु बद्धाशयाः अप्रतर्क्यवेगगतयः असुरा इवानिर्धार्यकोपपराक्रमादयः नरगन्धासहिष्णवश्च दृश्यन्ते, ते सर्वेऽपि असुरांशगजाः ज्ञेया इति । किंच एते असुरांशगजाः हरिणधेनुनरविहगादिप्राणिजालवधकार्यासक्तिभयः(भाजः) अकारणद्वेषभाजः प्राणिवर्गस्यासमयभयदाश्च भवन्ति । अपि च एते मातङ्गास्संक्रुद्धास्सन्तः तरुभंजनगृहभंजनमानुषवृन्दक्षोभादिदुष्कार्यकारिणश्च सुलभमसाध्यस्वभावाश्च दृश्यन्ते । अत एते सर्वैरपि त्याज्या एवेति महर्षेरुपदेशशैली ॥

II, ८९-९१ अथ पञ्चविंशतितमस्य पिशाचांशगजस्य लक्षणं विशदीकरोति—कृशदेहा इति । ये तु वारणाः आजन्म नितरां कृशशरीराः रोमावळिहीन(नाः?) ह्रस्वप्रमाणवालधयः मानुषबालान् धेनुवत्सादींश्च निरीक्ष्य तत्तर्जनताडनहिंसादिदुष्टकार्याचरणशीलाः आधोरणान् गृहाधिपतीनन्यांश्च वंचयित्वा नारिकेळेक्षुदण्डफलादिचौर्यकारिणः तदाशां विनैव असमयेष्वस्थानेषु संचारशीलाश्च भवन्ति ; ते सर्वे पिशाचांशगजा ज्ञेया इति क्रमः । अपि च एते पिशाचांशगजाः हठात् पतनकारिणः विनैव कारणानि हठात् पतनशीलाः कंपनभीतिक्षोभादिकारिणश्च भवन्ति । किंच ये ये वारणाः दिवानिशं दिग्भ्रमणकार्यासक्ताः सन्त्रुटितालानबन्धाः सन्तः वीथीमंटपादिषु प्रदेशेषु बहुषु कारणानि विनैव भ्रमणासक्ताः रक्तमांसादिभक्षणाभिलाषाग्रस्तमानसाः मेघध्वनिवत् पिशाचध्वनिवत् राक्षसध्वनिवदिव(वच) भयंकरकठोररींकारेण झटिति सर्वेषां विस्मयभयप्रकंपनादिदायिनः

भूतवेताळपिशाचा इव श्मशानभूमिसंचारिणश्च दृश्यन्ते ; ते सर्वे पिशाचांशवारणाः निगदिताः । अपि च यन्तृप्रयुक्तनानाविधसान्त्ववाक्यशिक्षाप्रयोगादिषु प्रायशो विमुखाः एते सर्वेऽपि पिशाचांशा दूरतस्संत्याज्याः सर्वविधकार्यानर्हा एवेति ॥

II, ९२-९५ अथ क्रमप्राप्तस्य षड्विंशतितमस्य सिंहांशगजस्य लक्षणान्युपदिशति—सिंहवदिति । ये ये वारणाः सिंहस्येव कठोरभयप्रदर्शकाररवाः नितरां ह्रस्वक्षुद्रकरतनवः सटावलीव्याप्तमस्तकस्कन्धतलाः पुरग्रामगजशालादिनिवासस्थानद्वेषिणः तत्र निबद्धा अपि पलायनपराः वनकुञ्जगुहादिनिवासकारिणः मृगेन्द्रवत् कारणादीन् विनैव दुर्बलजन्तुबृन्देषु हठात्पतनकारिणः तैः साकं समरताडनघट्टनमिश्रःकलहादिकमाकलयन्ति ; ये ये गजाः केसरिण इव नितरां उच्छ्रितलांगूलाः अमेयवेगाः रात्रिसंचारशीलाः समयेषु केषुचित् अंगारकणवत् प्रज्वलितनेत्राश्च भवन्ति ; एवं ये ये वारणाः सिंहा इव कृशोदरदलाः स्वल्पपुष्टपृष्ठभागाः यौवनकालमदाविर्भावकालकोपकालादिसमयेषु असाध्यजवबलोदयाः सर्वविधैरप्युपायैः मानुषवशविरोधिनः दृश्यन्ते एतादृशदुष्टा गजाः शीघ्रमेव संत्याज्या एवेति व्यवस्था ॥

II, ९६-९८ अथ सप्तविंशतितमस्य शार्दूलांशगजस्य लक्षणादिकं निरूपयति—दीर्घदन्ता इत्यादिना । व्याघ्राननपरिदृश्यमानदंष्ट्रा इव भयङ्करदीर्घकुशदन्तयुगळाः वक्रकुञ्चितपादनखाः स्वभावादेव कपटाशयाः स्वकीयं दुष्टभावं क्रूरकार्यादिकं च हस्तिपालव्याधादिभ्यश्चाप्यबहिष्कुर्वाणाः सकलाभिरपि चेष्टाभिः जन्तूनां हिंसावधतर्जनादिकारिणः मदिरारक्तपानाद्याबद्धभावाः अनिरोध्यकोपावेशाः शार्दूला इव धावनादिसमयेषु विवृतवदनाः लालासाविविवृतास्याः सत्यवाक्यसान्त्ववाक्यादिषु विमुखाः बलगर्विताश्च ये ये गजाः वर्तन्ते सर्वेऽपि ते शार्दूलांशा ज्ञेया इति । किंच अनयैव रीत्या येषां शरीरेषु शुण्डायामानने पादेषु वा एकस्मिन् पादे उदरपार्श्वे वा उदरपार्श्वयोरपि वा सर्वत्र द्वीपिशरीररेखाकाररेखा हरितकृष्णवर्णच्छुरिता दृश्यते, तादृशास्सर्वेऽपि गजाः शार्दूलांशा एव । दूरतस्त्याज्या एव । वधपर्यन्तशिक्षादानादिना एते सन्त्याज्या इति ॥

II, ९९-१०५ अथ क्रमप्राप्तस्यान्त्यस्य वानरांशस्य दुष्टगजस्य लक्षणादिकमाह—चलचित्ता इत्यादिना । ये ये गजाः मर्कटवत् सन्ततं चलचित्ताः कलितनेत्रभ्रमणाः वानराक्षियुगा वा दृश्यन्ते, एवमनवरताहारभक्षणनिरताः कारणं विनैव स्वेच्छावशात् मर्कट इव धावनशीलाः, मानुषबालधेनुवत्सादिप्राणिनां वञ्चनादिदुष्टकार्येषु बद्धाशयाः हठात्पतनताडनकारिणः नितरां कृशदेहा अपि मर्कटवत् दीर्घपुच्छाः

अस्थिरकार्यकराः शिक्षादिसत्कार्यविदूरगाः कठोरहुंकाररवप्रदर्शनादिना सर्वेषां झटिति मनःक्षोभमाकलयन्तः ते सर्वे गजाः वानरांशा सत्कार्येष्वनर्हाः दूरतस्सन्त्याज्या इत्युपदेशः। एतावता ग्रन्थेन प्रतिपादितेषु अष्टाविंशतिविधांशभासुरेषु गजेषु तत्र तत्र जनितेषु सुबुद्धिमान् महीपालः सचिवाघोरणव्याधादिसाह्येन स्वयमपि चिरं ज्ञात्वा सल्लक्षणान् गजान् बन्धनादिना स्वदेशमानीय गजशालासु पालयेत्। एवं मध्यमांशगजान् स्वमन्दुरा-जनितांश्च परिपाल्याः(लयेत्)। यदि न रोचेत तदा तानपि वने सन्त्यजेत्। अधमांश-गजास्सर्वेऽपि दूरतः परिहर्तव्या एवेति ॥ स्पष्टमन्यत् ॥

इति [नारद]गजशिक्षायां व्यक्तिटिप्पण्यां गजजात्यंशनिरूपणात्मकः

द्वितीयः पटलः

---

## तृतीयः पटलः

III, १-४ अथास्मिन् तृतीये पटले कुञ्जादिवनभूमितलेषु संप्राप्तजन्मनः शुभलक्षणभासुरान् तानुत्तमगजान् भूमिपालादयः कथं वा बन्धयेयुः केन वा प्रकारेण स्वदेशमानयेयुः इत्याकांक्षायां तत् सर्वमपि निरूपयति भगवान् नारदो मुनिरिति पटल-ग्रथनसंदर्भार्थो ज्ञेयः। तत्रादौ सल्लक्षणभासुराणां गजानां प्रयोजनादिकं निरूपयति उत्तमेष्वित्यादिना। गजा एव नरपालादीनामुत्तमकार्येषु सहायकारिणः सद्भटसन्निभाश्च। एवमापत्कालादिष्वपि उत्तममित्राणि गजा एव। यदि रक्षणादिना मानितास्ते सर्वे मतंगजास्तदा भूपालादीनां विजयलक्ष्मीमपारं यशः विपुलमैश्वर्यं च जनयन्तीति तन्महिमा। स्वबाल्ये वयसि यौवने वार्धके च काले सर्वैरपि प्रकारैर्गजा एव मनुष्याणां उत्तमसाह्यकरा निश्चिता इति। किंच कुलीनाः शान्तस्वभावाः दर्शनादेव पुंसां पुण्यवर्धकाश्च भवन्ति गजा इति विशेषतः तन्माहात्म्यादिकं ज्ञेयमिति ॥

III, ५-२३ असाध्यान्यपीति। सम्यक् शिक्षणादिना संप्राप्तकरकौशला-दिभिर्वीरभटैः सल्लक्षणभाग्भिः उत्तमैस्तुरगादिभिर्वा इह किल भूलोके यानि कार्याणि सुतरामसाध्यानीति निश्चितानि भवन्ति तादृशकार्याण्यनायासेन गजा एव साधयन्ति संपूर्णफलप्रदानि तानि कुर्वन्तीति परोपकाराय दीक्षितानां देवांशभाजां एतेषां गजानां चरित्रकीर्तनं प्रातरादिसमयेषु दर्शनं प्रीतिपूर्वकमाहारप्रदानादिकं च जनयन्ति बहुविध-श्रेयांसि भूपालानामिति तन्महिमा महर्षिभिरुपदिष्टः आदरणीयः। अपि च सुशोभनबुद्धि-शालिनामिभानां बहुविधा मनोहरलीलाः शश्वन्निरीक्षिता अपि न तृप्तये भवन्ति रसिकानाम्

इति तल्लीला नयनानन्दकारिण्यः पौनःपुन्येनानुभूता अपि अदृष्टपूर्वा इव जनयत्यानन्द-प्रकर्षादिकमिति तत्क्रमः। प्रचण्डपराक्रमा वारणा एव युद्धभूमौ रिपुसेनाभङ्ग-क्षोभादये प्रभवन्ति। अपि च भारवहनकर्मणि मृगयासु प्रासादकोशगृहपटगेहादि-रक्षणकार्य(येषु) समर्थाः गजा एव। गजैरेवोत्तमैः दूरमार्गयात्रासु बहुदिवसाद्यमातन्यते। तेऽपि दूरमार्गेष्वखिन्नाश्च भवन्ति। स्वभावादेवोत्तमगजाः स्वस्वकार्येष्वप्रमत्ता एव। हस्तिपकभटादिभिः प्रेरितास्सन्तः नाथकार्यनिर्वाहकाः। किंच एते वारणाः सुमेधसः आधोरणादिप्रेरितनानाविधदेशभाषागुम्फितगजभाषादिक्रमविदः गूढार्थेङ्गितज्ञाः शब्दज्ञाः सङ्केतशब्दविदः निजपालककण्ठध्वनिवेत्तारश्च। स्वपक्षवर्तिनां जनानामनुकूल-स्वभावाः प्रत्यर्थिवारणानां प्रतिभटमहीपालादीनां च यमस्वरूपा एते वारणाः निजनाथानां देशवासिनां च मङ्गळशुभफलादिदायिनश्च भवन्ति। किंच उत्तमाः गजाः निजयू-थैस्साकं निवासादिलालसाश्च दृश्यन्ते। विक्रमपङ्क्तिः शौर्यप्रदर्शनकालः, क्रमपङ्क्तिः रक्षासामर्थ्यप्रदर्शनकालः। एतादृशश्लाघ्यकार्येषु उत्तमा गजाः पुरोगाः सम्मानार्हाश्च भवन्तीति। अथवा विक्रमपङ्क्तिः वेगधावनधाटी, क्रमपङ्क्तिः स्वभावगमनम् इत्यादि-समयेषु परीक्षादिप्रसक्तौ उत्तमगजा एव पुरोगा दृश्यन्त इति। एतादृशशुभलक्षण-शुभगुणभासुरेषु वनचरेषु सहस्राधिकेषु गजेषु केचित् नीलमेघवत् मनोहरनीलवर्ण-(च्छुरिता)ङ्गाः। केचित् चलत्पर्वतसन्निभाः गम्भीराः परे मृगयाद्युत्तमकार्यसमर्थाः परे जलक्रीडादिनिरताः इतरे तु स्वकार्यैकपरायणाश्च भवन्तीति गजकुलगुणकार्यादिकं सर्वमपि चिरपरिचयात् विजानीयादित्युपदेशः। अपि च भद्रजातिगजाः मन्दजातिगजाश्च उत्तमाः। तेषां ग्रहणं तु वनतले गजबन्धस्थापनादिना कलयनीयमिति तत्क्रमः। किंच अनेनैव प्रकारेण मिश्रजातिगजाः संकीर्णजातिगजाश्च स्वीकार्या एव। एते तु भद्रगजमन्द-गजापेक्षया किञ्चित् हीनबला अपि कार्यसमर्थाः शुभदाः मन्जुलतनवः माननार्हाश्च भवन्तीति। अत एव पूर्वोक्तषोडशविधाः इन्द्रादिदेवांशभासुराः सर्वेऽपि गजाः एतादृश-भद्रजातिकुले वा मन्दजातिगजकुले मृगजातिगजकुले संकीर्णजातिगजकुले वा प्राप्तजन्मानो विलसन्तीति तत्कुलनिर्णयक्रमः। किंच सर्वेऽपि वारणाः परैः कल्पित-मुपकारमपकारं वा बहुसंवत्सरकालं स्वबुद्धौ धरन्ति। तं न विस्मरन्तीति तादृशरीत्या महनीयमेधाविलासवन्त इति भावः। किंच एते हस्तिनः प्रीतिपूर्वकं पोषणादिना मानिताश्चेत् तदा तेषां स्वामिनां देवोत्तमानां च परमा तुष्टिरुपजायते। तदंशत्वादिति।

अथ गजानां विशेषतो वासस्थलानि कुत्र वा दृश्यानीत्याकांक्षायामाह—

विन्ध्यस्येत्यादिना। अस्मिन् किल भरतखण्डे बहवो गिरिसानुभागाः उत्तमानि काननानि

नितरामुत्तमदेशाश्च पृथुमहीपालप्रभृतिभिरर्कवंश्यैः संविभक्ता एव। एतेषु सर्वेष्वपि प्रदेशेषु विविधकुलजा गजास्तत्र तत्र समुचितस्थले विरचितनिवासस्थानाः दृश्यन्ते। तथापि(हि) काश्मीरदेशकाननादिषु केचित् गजाः निवसन्ति। अपरे तु वारणाः काम्भोजदेशभूम्यामन्ये तु नेपालकोसलबाह्लीककेकयाङ्गवङ्गकलिङ्गमत्स्यसौवीरदेशभूमिषु निवासभाजः दृश्यन्ते। इतरे तु गजाः उत्कलदेशमध्यमदेशमल्लदेशभूभागेषु गङ्गायमुनाद्युत्तमनदीतीरभूमिषु लाटदेशभूमिषु द्रमिडदेशभूमिषु कर्णाटदेशाटवीवीथिषु स्थलान्तरेष्वपि पश्चिमकोङ्कणादिक्षोणीषु निवासभाजश्च दृश्यन्ते। अत्र प्रतिपादितदेशभूमिष्वेव उत्तमगजसंचारबाहुल्यमिति। देशान्तरेषु स्थलान्तरेष्वपि कतिपयानामेवोत्तमगजानाम् आवासस्थानं निर्दिष्टम्; काननान्तराणि तु गजप्रचारविरळान्येव (इति न) कथितानीति। अत एव स्थानेष्वेतेषु सर्वेष्वपि शुभलक्षणाः गजाः शतसहस्राधिकसंख्याः सुलभग्राह्या भवन्तीति॥ स्पष्टमन्यत॥

इति नारदगजशिक्षायां व्यक्तिटिप्पण्यां गजप्रयोजनगजस्थाननिरूपणात्मकः

तृतीयः पटलः

---

## चतुर्थः पटलः

IV, १-८ क्रमोदितेऽस्मिन् चतुर्थे पटले **तादृशगजबन्धनस्थाननिर्देशः गजबन्धनार्हसामग्रीसंपादनक्रमः तादृशवनभागेषु हस्तिनां संचारनिर्देशक्रमः तदर्थं शुभशकुननिरीक्षणादिश्च निगद्यते मुनिना भगवता नारदेनेति पटलार्थसंदर्भशैली। एवंरीत्या गजानां निवासस्थाननिर्देशकथनानन्तरं तादृशगजानां संग्रहणाय बन्धनस्थानं तावदङ्गवङ्गादिप्रसिद्धदेशकाननमध्यतले सर्वलोकक्षेमाभिवृद्ध्यर्थं आकलनीयमिति दिव्यचक्षुषो मुनयो वदन्तीति। कस्मिन् वा स्थले तादृशगजाः परिदृश्या इत्याकांक्षायामाह— निबिडोत्तुङ्गेत्यादिना। काननमध्यभागे यस्मिन् वासस्थले नितरामुत्तुङ्गनिबिडवृक्षसंघः वर्तते, प्रायशस्तत्र गजबृन्दं निवसतीति क्रमः। अपि च अरण्यमध्यभागे निर्भये भयादिहेतुरहिते सलिलबाहुल्ये स्थाने च गजसञ्चारः प्रायेण दृश्यते। एवमेव पर्वतप्रान्ततलेषु नदीकूलस्थानेषु च प्रायशो गजास्संचरन्ति बृन्दश इति। एतादृशस्थानेषु क्वचिदन्यत्र कुञ्जकुहरादिस्थलेष्वपि गजबृन्दानां नित्यवासः द्रष्टव्य एव। किंच अरण्यमध्यभागे पञ्चषगजाः सङ्घीभूय स्थाने क्वचिन्निवसन्ति। परे तु गजाश्शताधिकैः निजकरिणीतनयादिभिः समेतास्सन्तः वासमाकलयन्ति। अन्ये तु कासारतीरे वा निर्झरपतनस्थाने**

शीतलनदीतटभागे वा स्वेच्छासंचारिण एव दृश्यन्ते । अत एव तेषां सन्तुष्टिरभिवृद्धिश्च । किंच केचिद्वारणाः यौवनोदयकालेषु स्वशुण्डादण्डा(ण्डै,रानीतानि स्वादूनि तृणादीनि स्वस्वकरिणीभ्यः दत्वा ताभिस्साकमुल्लासगमनादिभाजश्च विलसन्ति । इतरे तु वारणाः प्रातरादिसमयेषु वृन्दशस्सङ्घीभूय स्वस्थानात् बहुदूरवनं प्रति गम्भीरयात्रासक्ताः । एव-मरण्यभागेषु तत्र तत्र गजवृन्दसञ्चारो बहुविधः व्याधकिरातादिभिराधोरणादिभिश्च चिराय निर्णेतव्यः, तदनन्तरमेव गजग्रहणाय बन्धनस्थानं [keddah] स्थापयेदित्युपदेशक्रमः ।

IV, ९-१८ अथ गजबन्धनार्हसामग्रीसम्पादनादिक्रममुपदिशति भगवान् नारदः—यत्र द्विपानामित्यादिना । विविधतरुषण्डनदीकूलगिरिसानुतटादिभिर्बहुविधै-र्विभक्तेषु काननतलेषु यस्मिन् स्थाने गजवृन्दसञ्चारः परिदृश्यते तच्च स्थानं चिराय चिरपरिचयादिना ज्ञात्वा निश्चित्य लोकक्षेमाय दीक्षितो मतिमान् महीपालो निजवशवर्तिनः मृगयाप्राप्तनैपुण्यान् शताधिकान् भटान् गजबन्धनकार्याय नियोजयेदिति । एतादृशगज-बन्धनस्थाननिर्णयानन्तरं गूढेन मार्गेणैव तच्च स्थानमाधोरणादिभिः वीरभटैः संप्राप्य-मादिष्टं कार्यसिद्धये । गम्भीरध्वनिकारिण्यः भेर्यः, मनोहरनिनदाः गजघींकारसदृश-मनोहरध्वनिदायिन्यः काहल्यः वाद्यविशेषाः, गजवृन्दकर्णनाडीप्वरुन्तुदध्वनिकारिणां पटहाख्यवाद्यविशेषाणां शतानि, दृढतरनिबद्धायोमयशृंखलानां पाशैरतिदीर्घा, एवमेव दृढतरग्रथितानां तन्तुरज्जूनां शणरज्जूनां पटलान्यसंख्येयानि, नानारूपसृण्यंकुशकरपाश-करदण्डमृगाक्षिनामकसुलोचनगजमोहनसामग्रीजालानि, सुशिक्षिताः बलाढ्याः त्रिंशद्वयस्का गजाः चत्वारिंशद्वयस्का गजाश्च स्वपक्षवर्तिनः, मनोहरयौवनमंडिताङ्ग्यः दश वा विंशति-स्तदधिका वा पुंगजमोहनकार्यसमर्थाः करिण्यः, सुबुद्धयः युक्तिशालिनः गजबन्धनकार्यदक्षाः पञ्चाशत्संख्याधिकाः हस्तिपकाः, सायुधाः व्याधा वीरभटादयः, अन्येषां पौरग्राम्यजनानां सहस्रं द्विसहस्रं तदधिकं वा, एतेषामाहारद्रव्याणि ; एतान्यन्यानि च उपकरणानि गज-बन्धनकार्यार्थमाहरणीयानीति प्राचीनानां मुनीन्द्राणामुपदेशक्रमो ज्ञेयः । एतैरेव गजबन्धनसिद्धिर्भवति नान्यैरिति तत्क्रमः । तस्माददोषाणि दृढानि सुपरीक्षितानि द्रव्याणि सर्वाण्येतानि कालक्रमेण गूढवर्त्मना गजसञ्चाररहितसमये बन्धनस्थलं नीत्वा तच्च द्रव्यजालं निगूढं परिपालयेदित्युपदेशशैली ॥

IV, १९-४४ कथं वा तादृशगजवृन्दसञ्चार(स्थल)स्थानं ज्ञेयं भवेदिति पृष्टे तच्च व्यनक्ति भगवान् नारदः—हस्तिनां पदपङ्क्त्या चेत्यादिना । वनभागस्थले

यस्मिन् यस्मिन् प्रदेशे पूर्वरात्रौ वा तत्पूर्वदिवसे इतस्ततो धावनशीलानां दर्पातिशयात् धावतां लीलासंचारादिना कलयतां च गजानां सैकतादिस्थलेषु पदपङ्क्तिर्व्यक्ताकारा नयनग्राह्या परिदृश्यते; एवं यस्मिन् यस्मिन् प्रदेशे संचरतां गजानां रींकारनिनदः श्रूयते; अनयैव शैल्या यस्मिन् यस्मिन् स्थाने इतस्ततस्संचरद्भिर्गजैः गर्वोद्रिक्तैर्मदान्धैश्च त्रुटितानां वनवृक्षाणां पलाशशाखापुष्पपतनादिक च परिदृश्यते; एवं वनहस्तिभिर्विसृष्टं विण्मूत्रादिकं च यस्मिन् यस्मित् स्थले संभवति; यस्मिन् स्थाने गजानां स्थानचिह्नं यस्मिन् स्थले तेषां शयनस्थानं विहारस्थानं, यस्मिन् स्थले तत्कृतवनवर्त्मनिरोधो वा मिथः कलहसमरादिलक्ष्म व्यक्तं दृश्यं भवति; तादृशस्थानं सर्वमपि गजसंचारार्हं तैस्तैर्लक्षणैर्निश्चित्य तादृशस्थले गजबन्धनस्थलं कर्तव्यमित्यादिकं सर्वमपि हितभाषणमादरणीयमिति व्यवस्था। एवमाचरणमेव फलाय कीर्तये च भवति। अपि च एवंरीत्या गजबन्धनस्थाननिर्णयानन्तरं तादृशस्थलं परितः प्रवृद्धेषून्नतेषु शतसहस्राधिकशाखाततिच्छन्नेषु वृक्षेषु वीरभटादीनां स्थितिस्थानं पर्णलतादिनिर्मितं ह्रस्वाकारमेव स्थापयेत्। तस्मिन्नेव क्षुद्रलतागृहे तादृशवनचरव्याधादयः अस्मिन् स्थले गजास्संघशो मिळिताः दूरत एव गच्छन्ति इत एवागमिष्यन्तीत्यादिकं सर्वमपि निश्शब्दं निरीक्ष्य पार्श्वतरुषु पार्श्वभूभागेषु च स्थितिभाजामन्येषां वीरभटादीनां रक्षणाय बन्धनकार्यादये च ऊहेङ्गितादिसंज्ञां कलयन्तीति तत्क्रमः। अत एव वनभूमौ वृक्षस्कन्धादिषु पार्श्वभूमितलेषु च निगूढमावासमाचरतां वीरभटादीनां स्थानं तावत् वातवेगातपवेगवृष्टिवेगादिभिरन्यैश्च वनतलनिवासिभिर्दुष्टसत्त्वैः अक्षोभ्यरचनं कालप्राप्यभोज्यादिसहितं भेरीपटहशृंखलारज्जुसृण्यंकुशाद्यायुधसंरक्षणस्थानसहितं च निर्मापयित्वा तच्च स्थलं बहुप्रयत्नेन संरक्षेत्। तादृशस्थलनिवासिनस्सर्वेऽपि वीरभटादयः गजागमनवेलासु दत्तदृष्टयः मौनमङ्गीकृत्य निवसेयुरिति च तत्क्रमः। एवंरीत्या रक्षणे प्रतीक्षणकार्ये च यथाक्रममाकलिते सति तच्च स्थलं निर्भयं मत्वा वनचराः मूढा गजाः पंचषदिवसकाले वा विंशतिदिनकाले क्वचित् एकमासाधिकसमये वा तत्र स्वेच्छाविहारार्थमागता भवेयुः। तादृशसमयं समुचितं मत्वा जागरूकास्ते तु वीरभटादयः स्वसंज्ञादिभिः करभल्लिकादिभिश्च अन्तस्थलप्रविष्टान् तान् वनगजान् सर्वानपि एकद्वित्रिमुहूर्तकालेनैव बन्धनभाजः कुर्वन्तीति तद्व्यवस्था। किंच वनमध्यभागवासभाजः केचित् गजाः दुष्टात्मानः सन्ततं कपटबुद्ध्या मनुष्यैरदृश्येषु वनमार्गेष्वेव गच्छन्ति गूढकायाः। परे तु निष्कपटा गजाः स्वकुटुम्बपरिमण्डितपार्श्वभागास्सन्तः यूथाधिपेन गजराजेन प्रथमतो निर्दिष्टं मार्गमनुसृत्य गच्छन्ति। एवं प्रतिदेशं गजानां गतिक्रमस्तु बहुप्रकारो मुनिभिर्निर्दिष्टः। तस्मात् तादृशं सर्वमपि वनस्थलं स्वयं युक्त्यादिभिस्तैस्तै-

ग्रहैश्च ज्ञात्वा गजबन्धनमाचरेन्मतिमानिति। अपि च तदर्थं गजबृन्दमोहनार्थं यौवना-कृतदेहाः स्ववशवर्तिन्यः करिण्यः दश वा विंशतिस्तदधिका वा दूरतः स्थले संरक्ष्याः। थलस्य तस्य पृष्ठभागे पार्श्वयोश्च बलाढ्यान् शिक्षितान् स्वकीयान् नगरगजान् बन्धनादिकार्य-गुणांश्च साधोरणकिंकरान् स्थापयेत्। तेषां पोषणादिकं च रहस्थल एव करणीयम्। श्चापि गजैः करिणीभिश्च मौनादिकमङ्गीकार्यमिति तत्परिपाटी। तादृशगजबन्धनरचना ावत् प्रायशो वनभूमिषु प्रातःकाले वा मध्याह्नसमये वनेषु केषुचित् सायंसमये वा माकलनीया; अयमेव समयः फलाय सुलभकार्याय च प्रभवति। कलिङ्गादिषु देशेषु केषुचित् नमध्यभागे रात्रिकाले गजानां विश्रान्तिनिद्रादिसमयेष्वेव बन्धनक्रिया कल्प्येति केचित्। ां तु रात्रिकालबन्धनरचनामप्रशस्तां मन्यन्ते महान्तः। अपि च तत्(सा) अपकीर्तये ापप्राप्त्यै श्रमादये च, अतस्सा वर्ज्येति भावः। अत एवंरीत्या शास्त्रोपदिष्टं ौख्यलाभादिप्रदं गजबन्धनसमुचितसमयं तत्रत्यगजबृन्दस्थित्यनुगुणं निश्चित्य महीपतिस्स-वेत्रसेनाधिपाद्यात्तवरसमावृतस्सन् तादृशवनमध्यभागमागत्य तादृशगजबन्धनक्रमदर्शनादये ान्नतेषु वृक्षेषु क्वचित् छादिताङ्गस्सन् गजागमनसमयादिकं सर्वमपि प्रतीक्षेतेति। ोषं स्फुटमेव।

IV, ४५-४८ गजग्रहणार्थमाकलितप्रयत्नेन महीभृता शुभशकुननिरीक्षणं शुभ-ाक्षत्रदिनान्वेषणादिकं च कार्यमित्युपदिशति—अश्विन्यामित्यादिना। वनमध्यभागे ाजबन्धनरचनार्थं अश्विनीनक्षत्रं प्रशस्तमादिष्टम्; एवं रोहिणीमृगशीर्षमखापुष्यहस्त-स्वातीरेवत्यादिषु जयप्रदशुभदिनेषु शुभलग्नसहितेषु समुचितदिनलग्नादिकं निश्चित्य मतिमान् महीपालस्तच्चाकलयेदिति। तस्मिन् समये शुभशकुननिरीक्षणं चाकलय्य यतेत। एवमाचरणमेव तस्य नृपस्य जयलक्ष्मीं, प्रजानां मङ्गळानि विविधानि, भटादीनां सम्माननादिकं चातनोतीति। स्पष्टमन्यत्॥

IV, ४९-५२ भूपालादिभिस्तत्र तत्र देशेषु किमर्थं गजबन्धनरचना कल्प-नीया; किं वा फलम् इत्याकांक्षायामाह—मदाविष्टैरित्यादिना। वनभूमिषु तासु तासु स्वेच्छासंचारवत्सु गजयूथेषु केचित् गजाः 'यौवनोदयकाले मदबलगर्वितास्सन्तः समीपस्थितान् देशानाक्रम्याकाले तत्रत्यसस्यादीन् नाशयन्ति। इक्षुवनकदलीवनादीनां च भङ्गमारचयन्ति। कुसुमशाखालुटनादिना वनलक्ष्मीरपि तत्तया दूरीक्रियते। एवं मदोद्रिक्तैस्तैरेव वनगजैः सर्वेषामपि प्रशान्तात्मनां धेनुहरिणवत्समनुष्यादीनां भर्त्सनतर्जन-वधहिंसादिकमपि हठात् विनैव कारणमातन्यते। तस्मात् तादृग्गजानां दुर्गुणादिनिरसनार्थं तद्द्वारेण स्वकीयविविधराष्ट्रकार्यसिद्ध्यर्थं देशक्षोभराहित्यादये च महीभृता गजबन्धनमा-

कलनीयमिति व्यवस्था । किंच यदा यदा वनतलेषु गजानामाधिक्यं विलोक्यते, तस्मिन्नपि समये गजबन्धनमाकलनीयमित्युपदेशकश्चादरणीयः ॥ स्पष्टमन्यत् ॥

इति नारदगजशिक्षायां व्यक्तिटिप्पण्यां गजबन्धनस्थाननिर्देशकथनात्मकः

चतुर्थः पटलः

---

## पञ्चमः पटलः

V, १-२३ अथास्मिन् पञ्चमे पटले गजबन्धनरचनाक्रमकथनात्मके प्रथमतः दुर्गबन्धनरचनाशैलीमुपदिशति गजबन्धनसिद्ध्यर्थमित्यादिना । संप्राप्तगजबृन्दसञ्चारे वनभूमितले गजबन्धनार्थं निश्चिते सति तदनु महीपालः तत्र वने एकस्मिन् भागे अगाधां विपुलां नित्यजलस्थितां दृढां परिघां खात्वा तादृशपरिघाया मध्यतले एकयोजनपरिमिते वा क्वचित् द्वियोजनप्रमाणपरिमिते सस्यबालतृणसल्लकीलताप्रमुखाणि गजभक्ष्यद्रव्याणि पुण्ड्रेक्षुकदलीश्यामाकादीनि च कालक्रमेण वर्धयित्वा तन्मध्ये तत्र तत्र विविधांश्च वृक्षान् गजमोहनादये संवर्धयेत् । एवं तत्र वनमध्यभागे परिघावृतदुर्गस्थानामाधोरणवीरभटादीनां गजबन्धनकार्योद्यमभाजां निवासस्थानं संकेतस्थानादिसहितं च प्रकल्पयित्वा एवं वनमध्यतले दुर्गप्रकल्पनानन्तरमेकमासाधिककाले गळिते सति तदा तच्च स्थानं निर्भयं मत्वा कदाचित् स्वेच्छासञ्चारपरं वनगजबृन्दं तत्रत्यभक्ष्याशया समागच्छेत् तादृशसमयं निरीक्ष्य अन्तिकस्थाननिर्मितगूढगृहस्थिताः व्याधकिरातवीरभटादयस्सर्वेऽपि संघीभूय अन्तस्थितान् तान् गजान् बन्धयेयुः पटहावलीताडनादिना गजानां भयङ्करकर्णारुन्तुदनिनदमुत्पाद्य तर्जयेयुः । पाशकुन्ताद्यायुधजालप्रदर्शनादिना मर्मभेदिभिरपि वाक्यजालैर्भर्त्सयेयुः । अपि च तस्यैव दुर्गस्थानस्यान्तर्भागे भीत्या भ्रमतः अप्राप्तबहिर्गमनमार्गान् सर्वानपि गजान् तादृशदुर्गद्वारमार्गनिरोधादिना बन्धयेयुः । महाप्रमाणैः दृढैर्दारुखण्डैः तादृशदुर्गस्थानस्य गजागमनमार्गं रुद्ध्वा तान् सर्वानपि गजानन्तर्भाग एव भ्रमणशीलान् कारयेयुः । एवंरीत्या प्रथमदिने दुर्गमध्यतले वन्यगजानां नवे परिभवे कृते सति बहिर्गमननिरोधकारिणि कृते सति दुर्गमार्गे तदन्तः भ्रमणशीलाः भीता गजास्सर्वेऽपि भृशकोपसन्तप्तमानसाः सन्तः चिरकालधावनादिना श्रान्ताः खिन्नाः क्षुधया तृषा च क्लेशभाजश्च भवेयुः । तेषु गजबृन्देषु केचित् गजाः दुर्गद्वारपार्श्वस्थितान् रक्षिणो वीरभटान् कोपावेशादिभिः शुण्डाप्रसारादिना शिलाखण्डदारुखण्डवीजनादिना ताडयेयुः । परे तु वधहिंसाकराश्च भवन्ति । रमणीयास्तरवो भग्ना

भवन्ति । एवमनेकधा वनक्षोभादिकमप्याकलयेत् । अत एव हस्तिपकादयः प्रथमे दिने तादृशगजानां दर्पक्रोधादिशमनार्थं तान् गजान् निराहारान् कारयित्वा द्वितीये दिवसे संप्राप्ते सति प्रायश्शान्तान् तान् वन्यवारणान् मृदुवाक्यप्रयोगादिभिः मनोहरकरिणी-योजनादिभिरनेकैः उपायैर्निरपायान् बन्धयेयुः । एवंरीत्या रचनाक्रमस्तु दुर्गबन्ध इत्युच्यते । एतस्मिन्नेव बन्धे सर्वेऽपि गजाः अव्रणाः ग्राह्या भवेयुः । अत एव अयमेव दुर्गबन्धः सर्वेभ्यः बंधेभ्यः प्रशस्ततम इति । किंच यत्र यत्र गजबाहुल्यं तत्कृतदेश-क्षोभादिकञ्च दृश्यते तस्मिन्नेव स्थाने युक्त्या नृपादयः एतादृशदुर्गबन्धस्थापनेन तादृशगजबृन्दं गृहीत्वा स्ववशमानयेयुरिति मुनेरुपदेशक्रमो ज्ञेयः ।

V, २४-३९ अथ द्वितीयस्य वारिबन्धरचनाक्रमस्य लक्षणमुपदिशति—यस्मिन् भाग इत्यादिना। प्रथमतः प्रतिपादिता दुर्गबन्धरचना तावत् तत्र तत्र वनभागेषु दुर्गनिर्माणादि-क्रियायोजनवशात् चिरकालसाध्या भवति । सा च कचित् वनभागे न घटते । अतएवास्य द्वितीयस्य वारिबन्धरचनाक्रमस्य साफल्यं सद्यः झडिति फलप्रदत्वादि(क मि)ति भावः। तस्मात् भूपालः वनमध्यतले वा कचित् गिरिसानुतटे नदीतीरे वा एतस्य वारिबन्धस्य स्थानं निर्दिशेत् । यथा प्रायशो वनभूमिभागे एकस्मिन् पार्श्वे कासारतटाकनदीमहाह्रदादयो दृश्यन्ते ; अथवा कचित् वनभूमिभागे पार्श्वयोरुभयोरपि तादृशकासारतटाकनदीमहा-ह्रदादिजलपूरः विलोक्यते ; अपरपार्श्वद्वये तु निबिडवृक्षमण्डलमथवा गिरिस्थितिः । एवमेव ब्रह्मणा वनसृष्टिक्रम इति भावः । अतो वनगजाः प्रायशः कदाचित् मध्याह्नसमये वनकठोरातपतप्तशरीरास्सन्तः तादृशतापप्रशान्तये जलावगाहनजलपानादये च यूथनाथगज-निर्दिष्टमार्गेण करिणीबालवत्सादिसहिता एव समागच्छेयुः । तथासमागतान् तांश्च गजान् (समागतान्) ज्ञात्वा पूर्वोक्तरीत्या तादृशस्थानस्य निकटस्थलप्रवृद्धेषु महावृक्षेषु निगूढ-स्थानभाग्भिर्व्याधवीरभटादिभिः तस्मात् तलात् येन वा प्रकारेण ते वनगजाः बहिर्निगच्छेयुः तथा गजानां मार्गमेकं वा मार्गद्वयं मार्गत्रयं तत्रत्यस्थलानुगुणमुपरुन्ध्यात् । किंच तादृशवन-गजानां बहिर्निर्गमनमार्गे बलाढ्यैः स्ववशवर्तिभिर्वीरगजैः वनगजसंमोहनकारिणीभिः करिणीभिः पटहकाहलीभेरीशंखादिरवोत्पादनकार्यव्यापृतैरनेकैः वीरभटैश्च सम्यक् पालयित्वा अन्तस्थल एव भ्रमणशीलान् क्षुद्बाधया पिपासया भयादिना स्वातन्त्र्यविगळनादिना च खिन्नान् तान् सर्वान् वनगजान् (सर्वानपि) अव्रणानेव बन्धयेदिति । अत एव बन्धमिममपि प्रशस्तमेव मन्यन्ते सुरोत्तमाः वासवप्रभृतयः । अवशिष्टः स्पष्टार्थः ॥

V, ४०-५५ अथ क्रमप्राप्तस्य तृतीयस्य वशाबन्धरचनाक्रमस्य लक्षणमाह—गजसञ्चारित इत्यादिना । पूर्वोक्तदुर्गबन्धरचना वारिबन्धरचना च मासक्रमसाध्या ।

द्रव्यधनधान्यादिव्ययपूर्वकं महाप्रयत्नसाध्या च भवति । तयोः बन्धयोः फलन्तु महदेव । शताधिकानां द्विशताधिकानां च गजानां पाळयः तयोर्बन्धयोः ग्राह्या भवेयुरिति तत्क्रमः । तृतीयायामस्यां वशाबन्धरचनायान्तु पञ्चपसप्तानां वनगजानामथवा दशद्वादशवन्यगजानां ग्रहणमेव भवेत् । नात्र बहुदिनकालविळम्बः । न बहुधनादिव्ययश्च । अस्य विशदार्थक्रमो यथा—तत्र तत्र गिरिसानुभागे वा वनमध्यकाननतले नगरोद्यानमध्यतले वा केचित् गजाः मदोद्धतास्समागत्य तादृशवनवृक्षशाखाकुसुमादिभञ्जनं फलभञ्जनं सस्यादिभञ्जनं मनुष्याणां क्षोभभयादिकमाकलयन्ति । तादृशानां मदगजानां पञ्चषट्सप्तसंख्यानामथवा कचित् दशसंख्याकानां कचित् तदधिकानां बन्धनग्रहणादिकं करिणीप्रेरणद्वारा कलनीयमिति । अत एव अस्य बन्धस्य करिणीबन्ध इति नाम प्रवदन्ति केचित् । अन्ये तु वशाबन्ध इति । यौवनमदोद्धताः तादृशाः वनगजाः प्रायशः कतिपयदिनपर्यन्तं भक्ष्याशया तत्रागत्य सस्यफलवृक्षोद्यानादीनां क्षोभमाकलयन्ति ; तादृशसमयं निरीक्ष्य महीपालादयः हस्तिपकाः वीरभटाश्च स्ववशवर्तिनीः यौवनमंडिताङ्गीः सप्त वाष्टौ दशद्वादशसंख्याकाः करिणीः गूढवर्त्मना तत्र नीत्वा झडिति तादृशवनचरद्विपानां मदांधानां पुरतःस्थले पार्श्वयोश्च (स्थापयित्वा) स्थापयेयुः । तया रीत्या स्वसमीपस्थायिनीः मनोहराङ्गीः करिणीः दृष्ट्वा नितरां कामवेगसंताडितमानसास्सन्तः ते मदान्धाः वनगजाः प्रहृष्टमेढ्रास्सन्तः स्वकीयशृङ्गार-लीलादिकांश्च तासां पुरतः प्रदर्श्य स्वशुण्डादण्डप्रसारादिना तासामाह्वानादिकम् आकलयितुं ताभिस्साकं संभोगमैथुनादिकमप्याकलयितुं यतन्ते; तादृशसमये आधोरणादय स्ववशवर्तिनीः शिक्षिताः करिणीः शश्वत् युक्त्या प्रेरयित्वा तादृशकरिणीशुण्डाप्रसारितदृढपाश-शृंखलादिभिः तासां मदांधवनगजानां कण्ठभागेषु पादेषु वालधिभागे च बन्धनमारचय्य स्ववशमानयेयुरिति । यौवनमदिरादिप्रवृत्तमानवा इव संपूर्णयौवनकाले कामपरवशाः तादृशवनगजाश्च करिणीमादरात् शश्वत् निरीक्ष्य तिष्ठन्ति । ताभिः करिणीभिः स्वकीयकण्ठ-पादादिस्थानेषु संकलितरज्जुपाशशृंखलाबन्धनादिकं न जानन्त्येव । ताभिरुत्पादितां मानुषपारतन्त्र्यरूपामापदमपि न गणयन्ति मोहातिशयात् प्रथमतः ; तदनन्तरं मुहूर्तद्वय-मुहूर्तत्रयगळनानन्तरं स्वकीयं पादादिस्थानेषु शृंखलाबन्धं हस्तिपकतर्जनभर्त्सनादिकं शृंगारसुखादिकमदत्त्वैव करिणीनां दूरस्थानगमनं मानुषपारतन्त्र्यादिकं क्रमशो जानन्तीति । अत एव वनगजानां मदान्धानां मोहसमयेष्वेव वशाद्वारा बन्धनमाकलय्य निजनगरस्थापितगजशालामानयेदिति । एतावता प्रबन्धेन प्रतिपादितायां दुर्गबन्धरचनायां वारिबन्धरचनायां वशाबन्धरचनायां च सर्वेऽपि वनगजाः व्रणादिरहिता एव ग्राह्या भवन्ति । अत एतत् बन्धनत्रयमपि युक्तमेव श्रेष्ठं च निगदितमिति । शेषं स्पष्टम् ॥

V, ५६-७३ अथ चतुर्थस्य गर्तबन्धरचनाक्रमस्य लक्षणमपि विशदयति मुनिर्नारदः—क्वचित् काननभूभाग इत्यादिना। कतिपयगजानामथवा गजवृन्दस्य प्रलोभनपूर्वकग्रहणार्थं महीपतिः क्वचित् काननमध्यभागे गर्तबन्धमिमं स्थापयेत्। अस्यैव गर्तबन्धस्य आपातबन्धः अवटबन्ध इति च नामान्तरं देशेषु केषुचित् व्यवह्रियते। एतादृशगर्तबन्धस्थापनस्थलं तावत् सहस्रदण्डदीर्घप्रमाणं क्वचित् वने तदधिकदैर्घ्यादिप्रमाणं स्वीकार्यमादौ। तादृशस्थलं परितः मतिमान् भूपालः गजवृन्दप्रलोभनार्थं पुंड्रेक्षुकदलीघासमल्लकीनारिकेळश्यामाकसस्यादीनि मासादिकालक्रमेण वर्धयित्वा तच्च स्थलं गोमायुव्याघ्रशुकशारिकादिभ्यः सस्यादिद्रव्यविनाशिभिः(भ्यः) रक्षेत्। एवमटवीमध्यभागे गजवृन्दनिवासस्थानसमीपे एतादृशप्रमाणयुते भूतले पूर्वोक्तेक्षुकदळीघासमल्लक्यादिगजभक्ष्यसस्यानि वर्धयित्वा तादृशस्थलस्य मध्यभागे दशदण्डायतिप्रमाणं विंशतिदण्डप्रमाणं पंचदण्डनिम्नमवटमेकं खात्वा तादृशावटस्य छादनमपि लघुवेणुदण्डादिभिराकलय्य निबिडच्छादितं कारयित्वा तदुपरि मृत्परागादीन् प्रसार्य तदुपरि च सस्यादिवर्धनं कारयेत्। एवंरीत्या अधोभागे निम्नस्य अवटस्य स्थापनं तदुपरितलमल्पद्रव्यैराच्छादितं सस्यकदल्यादिलसितं च कारयित्वा गजप्रलोभने कृते सति तादृशकपटकार्यमविज्ञाय तादृशसस्यादिभक्षणाशया कदाचित् सत्वरपदन्यासमागताः वनगजाः तादृशगर्तसमीपागमनसमये पूर्वोक्तकृत्रिमप्रच्छन्नद्रव्याणि वेणुदण्डप्रमुखानि गजभारासहिष्णुतया क्षणादेव भग्नानि त्रुटितानि च भवेयुः। तस्मिन्नेव क्षणे तादृशवनगजानां च तस्मिन्नवटे हठात् पतनमेव निश्चितम्। किंच एतादृशगर्तस्थानं तावत् एकं वा क्वचित् अवटद्वयमितरत्र अवटत्रयं अथवा दशाधिकानि क्षुद्राणि अवटबन्धनानि कल्पनीयानीति केचित्। तच्च युक्तमेव मन्यामहे तत्रत्यगजवनस्थलानुगुणमिति। अपि च एवंरीत्या अवटस्योपरितले प्रकल्पितं कृत्रिमकार्यादिकं सर्वमप्यजानन्तः वनगजाः सर्वेऽपि एकस्मिन्नेव क्षणे तेषु तेष्ववटेषु पतिताः भीताः क्रुद्धाः बहिर्निर्गमनधावनादिकार्येष्वशक्ता भवन्ति। तादृशानां वनगजानामेवंरीत्या गर्तपतनानन्तरं तत्समीपस्थवृक्षादौ गूढगृहस्थिताः वीरभटकिरातादयः सहसा समागत्य एकद्वित्रिदिनपर्यन्तं निराहारान् प्रशान्तदर्पाधिकान् गजान् सर्वानपि सामवाक्यसत्यवाक्यशपथवाक्यप्रयोगादिभिः सान्त्वयित्वा तदनु तमवटं सैकतमृदुपरागेष्टिकाखंडजालप्रपूरणादिना तान् गजान् निराबाधान् कृत्वा तान् क्रमेण बहिर्निर्गतांश्च कारयित्वा तदनु तादृशवनगजानां काष्ठशालादिस्थानेषु पूर्ववत् करिणीभिः वीरगजैः वीरभटैश्च शृंखलादिभिर्बन्धनमाकलय्य स्ववशमानयेदिति तत्क्रमः। किंच एवंरीत्या काननतले प्रकल्पितेषु कृत्रिमस्वरूपेषु गर्तेषु जनानां पतनसमये केचित् गजाः नितरां भीतिमवाप्य भग्नाशयाः विश्वासघातकाः सान्त्ववाक्यादिविमुखाः सुलभमसाध्याश्चाग्राह्या भवेयुः। अन्ये तु गजाः अवटेषु

पतनसमये जंघाशुंडामस्तकपादादिस्थानेषु मिथोघर्षणादिना वा पतनवेगाद्वा असाध्यव्रणादिकमपि भजन्ते। परे तु केचित् गजाः अधोमुखतया गर्तेषु पतनमाकलयेयुः। अन्ये तु उत्तानरीत्या वा पार्श्वभागेन वा गर्तपतनादिकं प्राप्नुवन्ति। एतादृशसमये गर्तपतनसमये केषांचित् गजानां प्राणहानिरपि जायते। अन्येषां गजानां असाध्यचिरस्थायि वैमनस्यं वैरादिकं चोपजायते। अत एव एतादृशो गर्तबन्धः गजहानिकरत्वात् न प्रशस्त इति महर्षयस्तत्त्वविदः वदन्ति। तथापि भूपालादयः बुद्धिमन्तः चिरपरिचयात् युक्त्या उत्तमानामाधोरणादीनां साह्येन च स्वल्पनिम्नमवटं निर्माय तादृशगर्तेऽपि वनगजानेतान् बन्धयेयुरिति तदा न दोषप्रसक्तय इति ॥ स्पष्टमन्यत् ॥

एतावता ग्रन्थेन सुलभग्रहणं सुप्रसिद्धं गजबन्धनचतुष्कस्वरूपमुपदिश्य भगवान् नारदो मुनिः कस्मिन् वा समये तादृशवनगजाः सुलभग्राह्या भवेयुरित्याकांक्षायामाह— वसन्त इत्यादिना। प्रायशः क्षितिमण्डले सर्वत्रापि देशेषु निवासभाजां सर्वेषामपि गजानां ग्रहणार्हकालः वसन्तकालः ग्रीष्मकालश्च प्रशस्ततम इत्युपदेशः। वर्षाकाले तु ते गजाः असाध्यमदाविष्टास्सन्तः सुलभग्राह्या न भवन्त्येवेति। एवं शरत्कालेऽपि केषुचित् देशेषु कांभोजादिषु गजानां मदवृद्धिकर एव। अत एव बुद्धिमान् राजा देशभेदं कालभेदं वृष्ट्याविर्भावादिकं काननभेदस्वरूपं गजकुलभेदादिकं च चिरेण ज्ञात्वैव गजबन्धनप्रारचयेदिति मुनेरुपदेशक्रम आदरणीयः। किंच काननोदरे एवंरीत्या गजबन्धनसमये स्ववशानीतेषु महाप्रमाणेषु गजेषु केचित् शिशवः अन्ये तु तदपेक्षया वयसाधिका बालाः परे तु मध्यमवयस्काश्च भवेयुः। तस्मात्तानपि तत्तज्जनयित्रीसमेतानेव स्वीकुर्यात्। वृद्धांश्च गजान् स्वीकृत्य स्वपुरगजशालासु संरक्षेत्। एवं प्रतिदेशं महीपालादिभिः गजबृन्दपरिपालनमेव राष्ट्रक्षेमाद्यभिवृद्धये भवतीति ॥

इति गजशिक्षायां व्यक्तिटिप्पण्यां गजबन्धरचनाक्रमकथनात्मकः

पञ्चमः पटलः

## षष्ठः पटलः

VI, १-८ एतावता प्रबन्धेन भगवान् मुनिर्नारदः क्षितिमण्डले प्रसिद्धानां चतुर्विधानां गजबन्धानां स्वरूपरचनाक्रमादिकमुपदिश्य तदनु गजानयनप्रकारमाह— एवं बन्धस्थल इत्यादिना। पूर्वोक्तप्रकारेण बन्धस्थलबद्धान् सर्वानपि वनगजान् सुबुद्धिभिः आधोरणादिभिः वीतशोकभयक्लेशादीन् कारयित्वा समुचितस्वादुभक्ष्यद्रव्यप्रदानादिना शपथवाक्यैः भो गजराज! त्वामहं सर्वविधैरपि प्रयत्नैः सततं रक्षयिष्मामि। दुःखादिकं त्यज, तुष्टिं भज, मयि स्नेहबन्धं कुरु, मदीयामाज्ञां परिपालय, मयि द्रोहचिन्तादिकं न कदापि करणीयमित्यादिभिः शपथवाक्यैः, इत आगच्छ, तत्र विहरेत्यादिभिः सान्त्ववाक्यैरन्यैरपि पोषणक्रमैश्च सन्तुष्टान् कारयित्वा स्वदेशमानयेयुरिति। तथा गजानामानयनसमये स्ववशवर्तिभिः शिक्षितगजैः महाकायैः तेषां वनगजानां पार्श्वरक्षणादिकं कार्यम्। ततः पश्चात्स्थले वीरभटादिरक्षणमिति तत्क्रमः। एवंरीत्या बन्धनस्थले बद्धानां वनगजानां आनयनसमये गजयात्रा तावत् प्रातःकाल एव प्रायशः प्रशस्ता। तदानीमेव तेषां स्थूलशरीरभाजां गतागतहानिराहित्यादिकमिति भावः। किंच गजयात्रा तावत् क्वचित् समयोचितकार्यनिर्वहणार्थं सायं समयेऽपि करणीया। पूर्वरात्रिकालेऽपि क्वचित् गजानयनयात्रा प्रशस्तैव एकैर्निः। परन्तु निशार्धभागसमये गजयात्रा न श्लाघ्या कीर्तितेति। एताहशसन्दर्भे गजानयनमार्गे प्रतियोजनं तत्स्थलमपि गजविश्रान्तये कल्पनीयम्। एवं मार्गमध्यतले श्रान्तान् गजानां सलिलपाने छायानिषेवणं स्वाद्यभक्ष्यादिप्रदानं च गजानां मनस्तुष्टिपुष्ट्याद्यै भवतीति। किंच एवंरीत्या वनगजान् सर्वान् समानीय सुरक्षितान् नगरतलस्थापितासु गजशालासु सर्वकालानुगुणभक्ष्यप्रदानादिना रक्षामाकलयेदिति। रजतसुवर्णमाणिक्यनीलवैडूर्यादीनि अन्यरत्नजालान्यपि सकलानि एताहशोत्तमगजानां षोडशकलामपि नार्हन्तीति मुनिनैव भगवता नारदेन गजप्रशंसा निगदितेति मतिः॥

VI, ९-१३ अनया रीत्या काननमध्यतलात् बन्धनस्थानेषु नवमाबद्धानां वनगजानामशिक्षितानां निजनगरादीन् प्रति आनयनं कालक्रमेण कारयित्वा उत्तमलक्षणभाग्भिराधोरणादिभिरेव तेषां वनगजानां विविधा गजशिक्षा कल्पनीयेति उपदेष्टुमारब्धः भगवान् नारदो मुनिरादावेव ताहशानामाधोरणादीनां वीरभटानां सल्लक्षणक्रमं संग्रहेण उपदिशति—आधोरणास्त्वित्यादिना। सर्वेष्वपि देशेषु प्रायशः हस्तिपकादिभिरेव गजरक्षणं सर्वदा सम्यक्परिदृश्यते। नान्यैस्तथा तत् भवतीति। तस्मात् सर्वजीवहितादिप्रदानकार्येषु दीक्षितो मतिमान् राजा प्रथमतः स्वस्वदेशेषु परम्परागतान् उत्तमगुणान् कुलीनानाधोरणानेव गजरक्षाकर्मसु नियोजयेदित्युपदेशक्रमः। लोके

तावन्मनुष्याणां सद्गुणादयस्तु विविधाः असंख्येयाश्च भवन्ति। तादृशेषूत्तमगुणेष्व-संख्येयेषु हस्तिपकादिषु कानिचिदेव लक्षणानि मुख्यानि निर्दिशति मुनिः। यथा— सर्वेपि आधोरणाः धीमन्तः गजप्रार्थनादिसमयानुगुणकार्यप्रयोगादिषु ततक्रमनिर्धारणादि-कार्यसमर्था धीः तादृशधिया स्वभावसंप्राप्तया मंडिता भवितव्याः। किंच प्राणिवात्सल्य-बन्धिता वत्सकरिणीगजादिषु मनुष्यवाग्रहितप्राणिवर्गेषु सन्ततमाबद्धदृढवात्सल्य-वन्तः गजभाषाक्रमज्ञाश्च; तत्तद्देशभेदानुगुणं गजकुलभेदानुगुणं च मानुषाणामिव गजनामपि भाषा भिन्नस्वरूपा भवति; अतस्तादृशायाः गजभाषायाः समुच्चारणादि-क्रमवेत्तारः। शूराः मदान्धानां बलाढ्यानां वनगजानां शिक्षाप्रयोगादिसमयेपु अ[ति]धीरस्वभावाः, तेभ्यः स्वशौर्यादिप्रदर्शनपराः। दृढचेतसः गजपोषणादिकालेषु स्वशरीर-श्रमग्लान्यादिकमप्यवि(ज्ञायअ)गणय्य तत्कार्यनिर्वहणार्हदृढमानसाः। इङ्गितज्ञाश्च तैस्तैर्गजैस्सूचितानां विविधानामिङ्गितानामिङ्गितकार्याणामपि यथाक्रमं वेत्तारश्च श्रेष्ठा आधोरणा निगद्यन्ते। किंच एवंरीत्या ये ये हस्तिपकाः युक्तिज्ञा गजपोषणतत्कार्यादि-प्रदर्शनसमयेषु कालानुगुणगजबलानुगुणगजवयःक्रमानुगुणस्वयुक्तिशालिनः मृगयादिषु समयेषु गजयुक्तिज्ञानवन्तश्च ये ये हस्तिपालाः क्रोधलोभविवर्जिताः गजानां रक्षणविषये आहारप्रदानविषये तत्करणीयभारोद्वहनादिकार्येषु च यदि गजस्खालित्यं मौढ्यं शाठ्यम् अथवा शिक्षावैकल्यविस्मृत्यादिना असमग्रत्वमन्यद्वा वैपरीत्यादिकं तादृशसमयेष्वपि निजक्रोधलोभमोहादिकार्याणामप्रयोक्तारः भवितव्याः। अत एव तेषां गजानां स्वेषां च सौख्यादिप्राप्तिरिति भावः। किंच ये ये हस्तिपालाः द्विपाहारविहारादिक्रमज्ञाः तेषां तेषां द्विपानां वयःक्रमानुगुणं कालक्रमानुगुणं च प्रदेयानां सल्लकीखादिरपुण्ड्रेक्षुकदलीघासादीनां गुणदोषप्रमाणादिक्रमवेत्तारः। एवं गजानां प्रातःकालविहार-सायंविहार-करिणीविहार-वत्सविहार-मृगयाविहार-स्वेच्छा-विहारादिक्रमवेदिनश्च ते श्रेष्ठाः। अपि च ये ये हस्तिपालाः कुलवेदिनः काम्भोज-काश्मीर - नेपाल-वङ्ग-कोसलादिगजकुलक्रम - तत्कार्यक्रम-तत्प्रमाण - तन्मूल्यादिनानाविध-गजविषयज्ञानशालिनः; ये ये गजपालाः सृणिकुन्तप्रयोगज्ञाः तेषु तेषु समयेषु आलस्य-शाठ्यमौर्ख्यादिदुर्गुणैर्यदि गजानां स्खालित्यमनैपुण्यादिकं वा विलोक्यते तदा तत्समीकरणाय गजानां वयःक्रमानुगुणं कार्यानुगुणं कालानुगुणं च सृणेः, अंकुशस्य, प्रेरण-दण्डस्य, पादताडनस्य मस्तकादिस्थानेषु करस्पर्शनादिप्रचोदनायाश्च क्रमप्रयोग-क्रमायुध-निर्माणक्रमादिवेत्तारश्च; ये ये हस्तिपालाः द्विपसंपोषणादराः समयेषु केषुचित् स्वाहार-कलनादीनप्यविगणय्य गजानामाहारप्रदानादिकमेव मुख्यं कर्मेति मन्यन्ते; ते च हस्तिपालाः श्रेष्ठा इति कीर्त्याः। किंच एवंरीत्या ये ये हस्तिरक्षिणः गतिशिक्षासु

कुशला: गजेभ्य: नानाविधशिक्षाक्रम-गतिक्रम-धावनक्रमादीनां प्रयोगसमयादिवेत्तार: तत्र कुशलाश्च प्राप्तनैपुण्याश्च श्रेष्ठा एव। ये ये आधोरणा: मृगयास्वपि लालसा: तेषां तेषामुद्यानतलानां सस्यक्षेत्राणामन्येषां वा संक्षोभादिकं यदि मत्तैर्वनगजैस्समाकलितं तादृशसमयेषु तं विषयादिकं राज्ञे विज्ञाप्य तदाज्ञावशादिना स्वयमपि देशक्षेम-सिद्धिस्थापनाय बद्धप्रेमाण: गजमृगयाक्रमविद: सिंहशार्दूलादिदण्डनमृगया-क्रम-तदर्हकालतदनुगुणसामग्रीसंपादनसमर्थाश्च श्रेष्ठा:। एवं हस्तिपालनकर्मणि नियोगभाज: सर्वेऽपि गजदण्डक्रमं तत् समयादिकं सामवाक्यप्रदानादिकं सर्वमपि ज्ञात्वा उचितसमयेष्वेव तत्प्रयोक्तारो भवितव्या:। अन्यथा अकालदण्डने अत्युग्रदण्डने वा कारणं विना दण्डने वा कृते (यदि तदा) तैर्गजैर्बलाढ्यै: क्रुद्धै: महत्यो विपद: समुत्पाद्यन्ते इति भाव:। एवं गजबृन्दाय दानादिकमकालकृतमपि विफलायेति। अपि च गजानां वनादानीतानामथवा देशान्तरात् क्रीत्वा समानीतानां सर्वेषामपि दन्तनख-मुखनयनमस्तकादिस्थानविवृद्धिं मस्तकभागेषु रोमावलिविवृद्धं प्रथमसंवत्सर-द्वितीय-संवत्सरादि-गजवय:कालादिकं च दिनक्रममासक्रमादिपरीक्षया भृशं निश्चित्य तादृश-वय:कालानुगुणं गजानां क्षेमसिद्धये शिक्षाक्रमप्रदानशीलाश्च हस्तिपाला: श्रेष्ठा: महीपालादिभिर्धनादिना संमान्या इति व्यवस्था। एवं ते सर्वेपि हस्तिपाला: तच्चिकित्सा-क्रमविदो भवितव्या:। तेषां गजानां बाल्ये वा वयसि मध्यमे वार्धके आहारदोषैर्वा आहाराधिक्यप्रदानादिना दुराहारप्रदानादिना नितरां स्वल्पाहारदानेन कारणै-रन्यैर्बहुविधै: यदि कदाचित् ज्वरनेत्रव्याधि-पादव्रण-मस्तकघट्टनव्रणादिभि: व्याधय: भवेयु:, तदा तादृशरोगनिवारणपटूनां विविधानामौषधानां सज्जीकरणं तत्प्रयोग-क्रमादिकञ्च ज्ञात्वा तद्रक्षकाश्च भवितव्या:। अत एव तेषां महापुण्यादिवृद्धिरिति भाव:। भूपचित्तानुवर्तिन: ये ये गजपाला: महीपालमन्त्रिसेनाधिपप्रमुखानां नेतॄणामाज्ञानुगुणं गजरक्षणकर्मसु निरता: तेऽपि उत्तमगुणशालिन इति सतां महीपाला-दीनामाज्ञाकरणमेव गजानां श्रेयसे भवति। वयमेव गजगुणशीलादिवेत्तार:, न भवन्त इति भूपालादीन् प्रति गजपालैस्सर्वदा गर्वादिवाक्यानि न वक्तव्यान्येव। परन्तु समुचितसमयेषु कार्यानुगुणमुचितविज्ञापनादिकमेवाचरणीयम्। अयमेव मुख्यो गुणो गजपालकानामिति। उपमर्दसहा: शश्वदिति—किंच ये ये आधोरणा: वत्सकुलकरिणी-गजबृन्दादीनां उपमर्दादि क्लेशसहा: तेऽपि श्रेष्ठा:। गजशिक्षादिसमयेषु विविधेषु लोके तावत् अधोरणानामुपमर्दसंमर्दपीडाताडनभयोत्पादनतर्जनादय: गजकृता: सर्वत्र सुप्रसिद्धा एव। किंच वनवृक्षादिवेदिन: गजानामाहारद्रव्यसंपादनार्थं राष्ट्रकार्यादिसिद्ध्यर्थं च तेषां तेषां वनवृक्षाणां खदिरखर्जूरपनसनारिकेळसप्तपर्णादीनां नामदारुगुणतद्वय:क्रमदार्ढ्या-

दिज्ञानशालिनश्च हस्तिपा: उत्तमा: । आदिशब्देन गजप्रिया: [illegible] निर्देश्या: । अपि च आधोरणानां सर्वेषामपि गजमार्गज्ञानं युक्त्या चिरपरिचय[illegible] सत् बहुफलप्रदं निर्दिष्टमिति । स्वगजानामागमनमार्गज्ञानं परगजानामागमन[illegible] वननदी-गुहाकुञ्जादिस्थलस्वरूपज्ञानं परमोपकारकं भवति हस्तिपालानामिति । एवमत्र मुनिना नारदेन संगृह्याधोरणगुणा: प्रतिपादिता: । एतादृशगुणास्सर्वेऽपि हस्तिरक्षकाणां वीरभटादीनां च बहूपकाराय राजसंमानादये कीर्तये पुण्याय च प्रभवन्तीति । अत एव महीपालादय: एतादृशसद्गुणशालिन एव आधोरणान् तद्भृत्यान् गजरक्षकांश्च परीक्ष्य चिरेण गजरक्षाकर्मणि नियोजयेयुरिति संक्षेपेणार्थविवृति: ॥

इति गजशिक्षायां व्यक्तिटिप्पण्यां गजानयनक्रमहस्तिपाललक्षणक्रमकथनात्मक:

षष्ठ: पटल:

---

## सप्तम: पटल:

VII, १-२७ अथास्मिन् सप्तमे पटले वनभागादानीतानां गजानां निवासार्थं सर्वविधशुभलक्षणसम्पन्नां गजशालां महीपालादय: निजनगरे स्थापयेयुरित्युपदिशति मुनीश्वरो नारद:—नगरान्तस्थल इत्यादिना। प्रधाननगरस्य मध्यस्थले वा नगरान्तरस्य मध्य भूभागे स्वकीये राष्ट्रे समुचिते स्थले क्वचित् तादृशनगरस्य दुर्गस्य वा बहि:प्रदेशे सा गजशाला महीभृता निर्माप्या भवति। अपि च सकलविधकार्यसौकर्यादिसिद्धये तादृशगजशाला नगरस्य वा प्रधाननगरस्य नातिदूरस्थिते भूमितले स्थापनीयेति फलकथनम्। अतस्तादृशीं गजशालां प्राचीदिङ्मुखस्थापितप्रधानद्वारभासुराम् अथवा क्वचित् तत्रत्यस्थलानुगुणं उत्तरदिङ्मुखस्थापितप्रधानद्वारां स्थापयेदिति तदीयद्वार-दिङ्नियमक्रम: शिल्पशास्त्रोपदिष्ट: आदरणीय एव सर्वै: भूयसे श्रेयसे। अयमुत्तम: पक्ष: इति भाव:। क्वचिद्देशे तत्रत्यनगरस्थित्यनुगुणं गजशालाया: पश्चिमदिङ्मुख-प्रधानद्वारकल्पनमपि न दोषाय शुभादये इति। अयं मध्यम: पक्ष: इति शास्त्रविदामाशय:। सर्वथा दक्षिणदिङ्मुखप्रधानद्वारसहितगजशाला न प्रशस्तेति व्यवस्था। किंच भूमिपाला: एतादृशगजशालास्थापनाय सहस्रदण्डप्रमाणां(ण)दीर्घाकारभूमिं वा क्वचित् तदधिकप्रमाणां भूमिं स्वीकुर्यात्। किंच दीर्घप्रमाणापेक्षया वैशाल्याधिक्यप्रमाणभूमिरपि गजशाला-स्थापनाय प्रशस्तैव। वैशाल्यापेक्षया दीर्घादिकप्रकल्पनं क्वचिद् गजशालायां सम्मतम्। अथवा नृपादीनामिच्छा(स्थला)नुगुणम् स्थलानुगुणं वा चतुरश्राकारप्रकल्पनयुता च

प्रशस्ता भवतीति तत्कल्पनस्वरूपव्यवस्था। किंच गजशालानिर्माणार्थं स्वीकृतायां निम्नोन्नतपाषाणखण्डभस्मास्थिखण्डादिभूदोषरहितायाम् उत्तमायां भुवि प्रथमतः प्रथमप्राकारकल्पनम्। तदन्तस्तले द्वितीयप्राकारकल्पनम्। तदन्तस्थले तृतीयप्राकारकल्पनं च क्रमादेवं निर्माप्यम्। तादृग्प्राकारनिर्माणं तावत् परस्परं बहुदूरस्थितं तिर्यगङ्गणसंयुक्तं चतसृष्वपि दिशासु गमनागमनयोग्यमहाद्वारसंयुक्तं प्रकल्पयेत्। किंच प्राकारस्य प्रथमस्य मध्यस्थाने महाद्वारमेकं स्थाप्यम्। कचित् तादृशमहाद्वारद्वयसहितमथवा द्वारत्रयसहितमपि कल्पनं निर्माप्यम्। द्वारचतुष्कस्थापनमपि प्रशस्तिलाभादय इति। एवमेव प्रतिप्राकारतलं द्वारस्थापनं दृष्टिदोषसूत्रदोषवैषम्यादिरहितं कल्प्यम्। किंच तादृशमहाद्वाराणां दृढकवाटयोजनं कचित् संमतमेव। तादृशकवाटहीनमहाद्वारकल्पनमपि न दोषायेति तद्व्यवस्था च ज्ञेया। अपि च एवंरीत्या प्रकारभित्तिनिर्माणानन्तरं तृतीयप्राकारस्यांतः-स्थले मध्यभागे महाचत्वरस्थापनं कतिपयवृक्षसहितमथवा तद्विहीनं प्रकल्पयित्वा तादृश चत्वरस्थानस्य किंचिद्दूरे प्राच्यां दक्षिणायां प्रतीच्याम् उदीच्यां च दिशि महाङ्गणनिर्माणं परस्परमिलितमेव निर्मापयेत्। तस्मिन्नेवाङ्गणतले बहुसंख्याकानां गजनिवासार्हदैर्घ्यवैशाल्यप्रमाणोपेतानां क्षुद्रमन्दिराणां निर्माणमादिशेत्। तथा च तृतीयप्राकारतले अष्टाविंशत्यधिकशतमन्दिरनिर्माणं गजनिवासाय निर्मापयेदिति फलितोऽर्थः ज्ञेयः। किंच अनयैव शैल्या द्वितीयप्राकारतलेऽपि अष्टाविंशत्यधिकशतमन्दिरनिर्माणम्। तृतीयप्रकारतलेऽपि अष्टाविंशत्यधिकशतमन्दिरनिर्माणमाकलनीयम्। तथा च द्विनवतिसंख्यायुतशतत्रयाणां गजानां नित्यनिवासार्थमियं गजशाला च प्रकल्पिता स्यादिति व्यवस्था। सर्वास्वपि गजशालासु एकद्वित्र्यादिप्राकारस्थापनं तदन्तर्भागे मन्दिरनिर्माणं च भूपालादीनामिच्छासौकर्याद्यनुगुणं स्वकीयगजसंख्याक्रमानुगुणं च [इति] निर्मापणीयनवीनमतक्रमश्च ज्ञेय इति। तथा च एवंरीत्या प्राकारनिर्माणानन्तरं तदन्तःस्थले क्षुद्रमन्दिरसहितानामङ्गणानां स्थापनं च रचयित्वा तादृशाङ्गणकोणतलेषु तत्र तत्र गजपानाय जलवेदिकाः तृणपल्लवाद्यादिभक्ष्यद्रव्यस्थापनवेदिकाः नानासमयेषु सौकर्यवर्धकानि निर्माणान्तराणि च युक्त्या शिल्पिवरैः दोषहीनानि लक्षणोपेतानि च निर्मापयेत्। अपि च तादृशाङ्गणतलेषु स्थापितमेकैकं क्षुद्रगृहम् एकैकस्य गजस्य निवासाय निर्दिशेदिति। किंच एतादृशी हस्तिशाला तावद् गजानां मदान्धानां मस्तकघट्टनशुण्डादण्डपादघट्टनादिबहुविधोपमर्दने कल्पितेऽपि यथा न भिन्ना शायिता न भवेत् तथा दार्ढ्यल(भा ?)सितैव प्रकल्पनीयेत्युपदेशः। किंच सुधेष्टकादियोजनादिना मासक्रमेण दृढामिमां गजशालां निर्मापयित्वा प्रतिक्षुद्रगृहं गजबन्धनस्थानसमीपे बहून् शिलाखण्डान् गजपादबन्धनार्हायःशृङ्खलादिसंवलितान् तत्र तत्र स्थापयित्वा प्रथमद्वारादिमुख्यकल्पनस्य

मौक्तिकाग्रं करण्डं वा शिखरं देवताप्रसादसिद्ध्यर्थं स्थापयेत् । किंचास्यां गजशालायां प्रतिक्षुद्रमन्दिरं महागवाक्षस्थापनं शिल्पिवरैः यथाक्रमं स्थापयित्वा तादृशप्रथमावरण-बहिःस्थले प्रधानद्वारस्य पार्श्वयोरुभयेरपि अतिदीर्घाकारां नानागृहयुतां महावेदीं निर्माप्य तेषु नानागृहेषु हस्तिपकादीनां नित्यावासस्थानं तदङ्गणस्य बहिःप्रदेशे आयुधशालां च प्रकल्पयेदिति । किंचास्यां गजशालायां तादृशाङ्गणान्तर्भागे चत्वरसमीपे वा प्रथमावरण-द्वारस्य नातिदूरे देशे गजाहारद्रव्यस्थापनगृहमादिशेत् प्रकल्पयेत् ॥ स्पष्टमन्यत् ॥

इति गजशिक्षायां व्यक्तिटिप्पण्यां गजशालालक्षणकथनात्मकः

सप्तमः पटलः

---

## अष्टमः पटलः

VIII, १-१२ अथास्मिन् अष्टमे पटले सर्वत्र क्षितिमण्डले तत्र तत्र निवासभाजां सर्वेषामपि गजानां नितरां गूढानि यानि श्रृंगारचेष्टादीनि तानि सर्वाण्यप्यहं स्पष्टमुपदिशामीति वासवं प्रति भगवतो मुनेर्नारदस्य प्रतिज्ञाक्रमः । किं चास्मिन् पटले कुञ्जादिस्थानेषु जनितानामिभशिशूनामेकसंवत्सरगळनावधि यानि यानि विहारचेष्टाकार्या-दीनि तान्यपि मुनिना निगद्यन्त इति विषयक्रमः । एतादृशगजरहस्यचेष्टादिज्ञानप्राप्त्या जातानां गजशिशूनामेकमासद्विमासादिवयःक्रमज्ञानप्राप्त्या च हस्तिपालानां भूपालानामन्येषां च जनानां महान् लाभः कीर्त्यादिश्च भवेदिति तत्फलकथनम् । अपि च लोके तावत् देवयक्षगंधर्वोरगराक्षसमानुषादीनां यथा वा यौवनकाले कामप्रवृद्धिराकलिता भगवता पद्मयोनिना तथैव सर्वेषामपि गजानां कामप्रवृद्धिरपि प्रायशो नितरां गूढा सूक्ष्मं प्रदृश्या भवतीति । अत एव सर्वे गजास्तादृशयौवनकालमवाप्य विविधश्रृंगारविलासभाजस्सन्तः करिणीसमीपमासाद्य तत्र तत्र मनोहरस्थानेषु स्वशुण्डादण्डेन करिणीकण्ठसमाश्लेषं-तदङ्गस्पर्शनादिकं रहःस्थले मुहूर्तत्रयकालमथवाधिककालेन मैथुनक्रियादीन् नानारूपश्रृंगार-चेष्टादिकानाकलय्य तदानीमेव तासां करिणीनां गर्भप्रदानशीला भवन्तीति तत् रहस्य-क्रियाक्रमः । एवंरीत्या संप्राप्तयौवनविलासैः बलाढ्यैः पुरुषगजैः साकं चिरं विहृत्य संप्राप्तगर्भाः करिण्यः सर्वा अपि क्रमेण गर्भभारात् श्रान्ताः सत्यः मन्दगतयः गर्भालस्यादिना स्वयं मिताहाराश्च भवन्ति । एवंरीत्या संप्राप्तगर्भाणां तासां करिणीनां समीपत एव ते पुङ्गजाः कामासक्तास्सन्तः तासां करिणीनामाहारार्थं स्वादूनि मधुराणि शल्लकीपुंड्रेक्षु-कदळीनाळादीनि स्वशुण्डादण्डेनाहृत्य ददुः । सन्ततं तन्निकटतटमेवाश्रित्य तद्रक्षणशीलाश्च

## नवमः पटलः

IX, १-४ अथास्मिन् क्रमप्राप्ते नवमे पटले सर्वेषामपि गजशिशूनां गजशिक्षाक्रमं वक्तुमारब्धः भगवान् नारदो मुनिरादौ द्वितीयवत्सरवयस्कानां गजशिशूनां लक्षणादिकं संग्रहेणोपदिशति—द्वितीये वत्सर इत्यादिना। पूर्वोक्ते अष्टमे पटले गजशिशूनां जन्मदिनप्रभृति प्रथमसंवत्सरगलनपर्यन्तं यानि यानि लक्षणानि दृश्यानि भवन्ति तद्रूपादिकं उपपादितमिति। अत एवास्मिन् पटले द्वितीयसंवत्सरकालमारभ्य गजकार्याणि निरूप्यन्त इति। लोके तावत् सर्वेऽपि गजाः प्रायशः द्वितीयसंवत्सरमासाच्चैव प्रथमवत्सरापेक्षया बलाधिक्यभाजः सन्तः त्वरितगमनाश्च भवन्ति। किं च गजशिशूनामस्मिन् द्वितीये वयसि मातुः स्तन्यपानादिकं कादाचित्कमेव निर्णीतम्। इतः पूर्वं प्रथमवत्सरगळनपर्यन्तं सर्वेऽपि गजशिशवः प्रायेण प्रतिदिनं वारत्रयं स्तन्यपानरता एव। केचित् शश्वत् स्तन्यपानासक्ताः इति तन्नियमः। विशेषान्तराणि तु स्पष्टार्थकान्येव। अत एव न व्याख्यातानीति॥

IX, ५-१० अथ तृतीयवर्षवयःकालभाजां सर्वेषामपि गजशिशूनां लक्षणानि व्यनक्ति—तृतीय इत्यादिना। तृतीये संवत्सरे संप्राप्ते सति गजशिशवः सर्वेऽपि नानाविधगजशिक्षाभ्याससमर्था भवन्ति। केषुचिद्देशेषु केचित् गजाः तृतीये संवत्सरे चतुर्थे संवत्सरे च शिक्षार्हा निगदिता इति। तथा च तृतीयाब्दकालमारभ्य सप्तमवर्षावधिक एव सर्वेषामपि गजशिशूनां शिक्षाभ्यासार्हकाल इति फलितोऽर्थो ज्ञेयः। परन्तु तत्र गजकुलानां तेषां तेषां स्वरूपगुणादिकं तेषां तेषां गजशिशूनां बुद्धिशक्तिप्रसारगुणशीलादिकं च ज्ञात्वा सम्यक् परीक्ष्य च हस्तिपकादयः गजशिक्षाभ्यासकर्मणि निरता भवेयुरिति उपदेशक्रमश्च ज्ञेयः। अयं तु विषयः प्रसक्तानुप्रसक्त्या निगदित इति। अथ क्रमप्राप्तानां तृतीयवर्षवयस्कानां गजशिशूनां स्वरूपादिकं कथं ज्ञेयमित्याकांक्षायामाह—समां प्राप्य तृतीयामित्यादिना। तृतीयसंवत्सरवयस्काः गजशिशवः सर्वेऽपि अतीव त्वरितपदविन्यासा भवन्ति। एवमस्मिन्नेव वयसि गजशिशूनां बालदन्तयुगळप्रादुर्भावश्च निश्चितः। तीक्ष्णमेधासमन्विताः बहुविधशिक्षादृढस्मरणबुद्धिप्रसारादिना समुज्ज्वलाश्च। अपि चास्मिन् तृतीये वत्सरे प्रायशः गजशिशवः सान्द्रशरीरत्वग्भागाः निबिडसन्धिबन्धाश्च विलोक्यन्ते। किंचास्मिन्नेव वयसि केषांचित् गजशिशूनां मुखमध्यभागे शुण्डाप्रारम्भतले च रक्तवर्णबिन्दूनां बहूनामाविर्भावश्च निश्चितः। परेषां गजशिशूनां तु कर्णतालमध्यतले कर्णाग्रभागेष्वथवा कर्णरन्ध्रयुगळसमीपतले तादृशरक्तवर्णाकाराणां बिन्दूनाम् उत्पत्तिरपि दृश्या भवेत्। किञ्चास्मिन्नेव तृतीयवयसि

गजशिशूनां मस्तकभागेषु निबिडरोमावलिप्राप्तिश्च। एवं ज्ञापकशक्तिदृढस्मरणशकृत्यादिना श्लाघनार्हाः क्रमेण पुष्टाङ्गाः मुहुर्मुहुर्मनोहररींकारकारिणः आधोरणादिनिर्दिष्टाज्ञासु स्थानादिषु च अचञ्चलस्थितिभाजश्च विलोक्यन्ते। अपि चास्मिन्नेव वयसि केषांचित् गजशिशूनां गजशिक्षाभ्यासादिकालेषु स्वल्पकोपप्राप्तिश्च भवेत्। [अ]श्रमादिस्तत्र हेतुरिति ॥

११-१३ चतुर्थवर्षवयस्का गजाः कथं ज्ञेया इत्युक्ते तेषां लक्षणान्याह—वृक्षाणामित्यादिना। तृतीयवर्षापेक्षयाऽस्मिन् चतुर्थे वर्षे सर्वेऽपि गजशिशवः बलाधिक्यमवाप्य स्वजात्यनुगुणलीलासु बद्धाशयास्सन्तः मार्गमध्यतलस्थितानां समीपस्थितानां वृक्षाणां भञ्जनाय कृतप्रयत्नास्सन्तः स्वशुण्डादण्डमतिदीर्घं प्रसारयित्वा तादृशवृक्षशाखाभञ्जनत्रुटनमाचरन्ति। समयान्तरे दारूणां भित्त्यादीनां च भञ्जनादिषु कृतप्रयत्नाश्च भवन्ति, दर्पाद्यावेगात् स्वजातिप्रयुक्तादिति। प्रबलगजसाध्यकार्यादिषु लौल्यादेते चतुर्थवर्षवयस्का गजशिशवः प्रयत्नं कुर्वन्तीति स्वभावकार्यवर्णनक्रमः। अपि च जाठराग्नेराधिक्यमवाप्य शश्वदाहारास्वादनपरा दृढशुण्डाः भृशधावनादिषु जङ्घापादादिसंधिबन्धेषु संप्राप्तबलाः कार्यशिक्षणादौ दृढज्ञानवन्तः नियमेन प्रातःकाले सायंसमये च मन्दगतिवेगगतिधावनगत्यादिषु प्राप्तलौल्याः स्वयूथगजशिशुभिस्समानवयस्कैः वयसाधिकैर्गजैश्च मिलित्वा कोलाहललीलादिकमाकलयेयुरिति। एवं चतुर्थवर्षवयस्कगजानां लक्षणं संग्रहेणोक्तम्। लक्षणान्तराणां परिज्ञानं तु चिरपरिचयादिनैव प्राप्तव्यमिति तत्क्रमः। एवं सर्वत्रापि व्यवस्थाशैली।

१४-१७ तत इति—पञ्चमवर्षमासाद्य गजाः सर्वेऽपि दृढपादादिसन्धिबन्धाः अत एव शरप्रसारवत् अतिवेगगतिशालिनः नारिकेळपलाशसप्तपर्णवृक्षशाखादिनैकद्रव्यभक्षणशीलाश्च भवन्ति। इतः परं(पूर्वं ?) गजशिशूनां रात्रिकाले मुहूर्त्तद्वयमुहूर्त्तत्रयपर्यन्तं निद्राप्राप्तिस्सञ्जाता। एतादृशपञ्चमवर्षकालमारभ्यैव सर्वेषां गजानां तादृशनिद्रायाः संकोच इति व्यवस्था बोध्या। किंच पंचमवर्षगजाः शिक्षाप्रयोगसमये किञ्चित् बुद्धिश्रमं शरीरश्रमादिकमप्यवाप्य स्वल्पकालविश्रान्तये सस्पृहा भवन्तीति। किंच एते गजाः दूरमार्गगमनागमनकार्येषु समर्थाः आधोरणादिभिराकलितामाज्ञां शिरसा प्रतिगृह्य तदनुगुणकार्यव्यापृताः मुहुर्मुहुः कार्यादिषु प्रेरिता अपि सन्तुष्टमानसाः तदाचरणपराः मध्याह्नादिसमयेषु सूर्यातपतप्ततनवः वृक्षाणां निबिडां छायाम् आश्रयन्ते। किंच एतेषां

गजानां पञ्चमवर्षवय:कालमारभ्यैव क्रमेण कामोत्पत्तिः। अत एव प्रथमयौवनकाल-भाजामेतेषां नयनान्याननतलानि शुण्डादण्डाश्च मनोहरकान्तिभासुरा भवन्ति। अपि च दन्तयुगलस्य दार्ढ्याधिक्यं धीरमतित्वं चोद्भवति। केषांचित् शिशूनां पंचमवर्षकाल-मारभ्यैव गण्डतले मदजलस्रावस्य प्रादुर्भावः दृश्यो भवतीति मुनेर्नारदस्योपदेशः। देशभेदेन गजजातिभेदादिना च सप्तमवर्षे वा अष्टमे नवमे वर्षे गजानां गंडयोः मस्तके च मदजलप्रसार इत्यपि च क्रमो ज्ञेयः। किंचास्मिन् वयसि पञ्चमे केचित् गजशिशवः शिक्षाप्रयोगादिकार्यसमयेषु स्वल्पकालं स्खालित्यमवाप्य दण्डनार्हा भवन्तीति। तथाप्येते मनोहरसौन्दर्यमंडिता राजन्त इति।

१८-२१ मस्तक इति—षष्ठवर्षवय:क्रमभाजां सर्वेषामपि गजानां भद्रजाति-जनितानामथवा मन्दजातिजनितानां उत्तमवनजननभाजां मस्तकभागे कर्णयोः शुण्डाग्रे उदरपार्श्वयोरपि मदजलस्रावः सन्ततं दृश्यो भवेत्। कामाधिक्यप्राप्तिवशादिति भावः। किंच सप्तमे(षष्ठे) वयसि स्थिताः वारणाः नितरां पुष्टिभाजः हस्तिपालनिर्दिष्टविविधकार्यादिक्रमं सम्यक् स्वबुद्धिविकासेन ज्ञात्वा तन्निर्वहणशीलाश्च भवन्ति। किंचास्मिन् वयसि केचित् गजाः समवयस्कानां करिणां वयसाधिकानां करिणां च पुरतः स्थित्वा गमनं वा शिक्षाप्रयोगक्रमं कार्यान्तराणि च साधयितुं यतते। किंज एते गजाः गजपालकादीनामि-ङ्गितक्रमादीन् ज्ञात्वा तत्र तत्र कर्मणि विगळितभयाः स्वकीयं बलपौरुषादिकमपि प्रदर्शयन्ति। किंच केषांचित् गजानां महाबलपराक्रमादिभाजामस्मिन् षष्ठे वयसि कामाधिक्यमुपलक्ष्यते। तेन कारणेन मदोद्धताः प्रहृष्टमेढ्रास्सन्तः करिणीं निरीक्ष्य तत्र तत्र तद्भोगाय तामनुधावन्ति। अपि च एतादृशकामोद्रेककाले चपलमानसाः केचित् गजाः शिक्षाप्रयोगादिकार्याचरणं कर्तुं प्रायशः असमर्थाश्च भवन्ति मूढात्मानः धीमौढ्य-युताश्च क्षणकालं वा एकमुहूर्तमथवा मुहूर्तद्वयकालं कामपरवशा एव विलोक्यन्ते। तथापि मुहूर्तान्तरे ते तु गजाः विमलधियस्सन्तः निजगम्भीरस्वभावादिना निर्जितकाम-वेगादयः दृश्यन्ते। एवं निजशिक्षादिकं सर्वमपि स्मारं-स्मारं हस्तिपालादीनामाज्ञानुगुणं तदाचरणलालसाश्च भवन्तीति क्रमः। तथाच अस्मिन् षष्ठे वयसि गजास्सर्वेऽपि क्षणकालं प्रथमकामोद्रेकमाप्नुवन्ति। तादृशकालेषु ते क्रियाऽसमर्था भवन्ति स्वभावचाप-ल्यात्। तथापि मुहूर्तान्तरे ते आत्मीयं विमलस्वभावं शिक्षाकल्पनादिना समुज्ज्वलितं गुणजालं च प्रकटयन्तीति निष्कृष्टार्थक्रम इति॥

२२-२५ सप्तमाब्दमिति—सर्वेष्वपि देशेषु निवासभाजा गजाः स्वकीये सप्तमे वर्षे हस्तिपालादिभ्यः संप्राप्तसकलविधशिक्षाक्रमाश्च भवन्ति। तथा च तृतीयवर्ष-

मारभ्य एतादृशसप्तमवर्षकालावधिकमेव गजानां सर्वेषामपि उत्तमशिक्षाप्रयोगसमय इति व्यवस्था। किंच दिनक्रमेण मासक्रमेण संवत्सरक्रमेण च वृद्धिभाजः एते सप्तमवर्ष-वारणाः संफुल्लनयनाः क्रमविस्तृतविशालमुखभागाः पूर्वसंवत्सरापेक्षया नितरां प्रवृद्धकाम-वेगाः अत एव नानाविधकामक्रीडास्वेव प्रवृत्तमानसाः वनभागेषु नितरां प्रमत्ताः स्वेच्छा-सञ्चारक्रमेण संप्राप्तविलासाश्च परिदृश्यन्ते। एवं वनभागवासिनां गजानां लक्षणम्। वनात् नगरादिकमानीताः गजास्सर्वेऽपि एतादृशसप्तमे वयसि पूर्वोक्तरीत्या (एतस्मिन् सप्तमे वयसि) संप्रवृद्धकामवेगाः अपि शिक्षादिना समुज्ज्वलितचेतसः निर्जितकामवेगाः सकलविधकार्याचरणदत्तादराश्च भवन्ति। अस्मिन् किल सप्तमे वयसि समुचितसमय एव गजाः करिणीसमीपे प्रवृद्धं निजकामवेगं प्रदर्शयन्तीति क्रमः। तत्र हेतुः शिक्षाप्रयोगादिरेव। अत एवंरीत्या विजितकामक्रोधादयः गजाः बहुदूरमार्गगमनादिषु नानाविधक्लेशसहाः त्यक्तदुर्गुणाः अत एव दण्डनादिदूरगाः समुज्ज्वलितधीभृतश्च विलोक्यन्ते।

२६-२८ संप्राप्त इति—अष्टमं वर्षमासाद्य सर्वेऽपि गजाः नितरां प्रवृद्धदृढस्थूल-दन्तयुगळाः पूर्वसंवत्सरापेक्षया सौन्दर्याधिक्येन यौवनप्रवृद्ध्या च नराणां नयनानन्ददायिनश्च दृश्यन्ते। किंच पूर्वोक्तरीत्या वनचराः गजाः एतस्मिन् वयसि नितरां कामवेगमवाप्य करिणीभोगलालसास्तदन्तिकोपसर्पणपराः सन्ततं ताभिस्साकं स्नानाहारविहारनिद्राशयादि-सुखभाजश्च भवन्ति। नगरशालादिषु निवासभाजः मानुषवशमापन्नाः गजास्तु एतस्मिन्नष्टमे वयसि संपूर्णकामवेगा अपि निर्जितमानसा एव भवन्ति। यदि करिण्यां लब्धायां तदा तया साकं शृंगारलीलापरायणाश्च भवन्तीति तत्क्रमः। अपि चास्मिन् वयसि गजानां गंडादिस्थलेषु मदजलवर्षाधिक्यं बलवीर्यप्रवृद्धिः पर्वतारोहणसामर्थ्यादिकं निर्भयत्वम् अत्यादरतः कार्याचरणाभिमुख्यं च स्पष्टं विराजते। अत एव एते गजाः चन्द्रवत् महीपालवत् लाल्या इति।

२९-३० नवममिति—अष्टमवर्षापेक्षयाऽस्मिन् नवमे वयसि सर्वेषामपि गजानां बलाधिक्यं वीर्याधिक्यं परिदृश्यते। एवं सुन्दराङ्गाः दृढदन्ताः अस्खलितप्रज्ञाशक्तयः विविधकार्यसमयेषु सञ्जातान् सकलविधक्लेशतापादीननादृत्य तत्कार्यनिर्वहणशीलाः शरवत् बाणवेगवत् अदृश्यधावनादयः मनोहरश्यामळवर्णभूषिताङ्गाः प्रातरादिषु समयेषु मनोहर-रींकारध्वनिकारिणश्च भासन्त इति।

३१-३५ दशममिति—क्ष्मातलेऽस्मिन् जननभाजः दर्शनादेव मानुषाणां पुण्यप्रवृद्धिकराः इन्द्राद्युत्तमदेवांशशालिनः सर्वेऽपि गजाः एवंरीत्या प्रथममासप्रभृति दशम-

संवत्सरपर्यन्तं दिनक्रमप्रवृद्धिभाजः सन्तः इन्द्रनीलहीरमणिमाणिक्यादिवत् मूल्यनिर्धारणानर्हाः बहुद्रव्यप्रदानादिना क्रय्याः तत्र तत्र काननेषु गजशालासु च सन्तोषविलासभाजो दृश्यन्ते। किंचास्मिन् दशमे संवत्सरे संपूर्णशरीरवृद्धिभाजः पूर्णकामाः सर्वकार्यसमर्थाः दृढदन्तदृढ-पादाद्यवयवाः परैस्सुलभमप्रधर्ष्याः अग्राह्याः अप्रकम्प्याश्च भवन्ति। किंच जलदवन्मनोहररींकारध्वनिकारिणः एते दशवर्षवयस्का गजाः स्वलीलादिभिः सर्वेषामपि जनानां नयनानन्दकारिणश्च भासन्ते। सर्वलोकहितकारिणा भगवता नारदेन एवंरीत्या सर्वेषामपि गजानां प्रथममासप्रभृतिदशमसंवत्सरपर्यन्तं यानि यानि दृश्यकार्याणि गूढकार्याणि शुभलक्षणान्यशुभलक्षणानि तानि सर्वाणि संग्रहेणोपदिष्टानीति व्यवस्था। इतः परं सूक्ष्मधीशालिभिर्महीपालैर्गजपालकैश्च सर्वेषामपि गजानां वयःक्रमप्रयुक्तकार्यादीनि स्वयं ज्ञेयानि। एकादशवर्षप्रभृति विंशतिवर्षपर्यन्तं गजास्सर्वेऽपि अधिकबलपौरुषशालिनः मिथः कलहकार्येषु परस्परगजयुद्धादिकार्येषु भारवहनकार्येषु च समर्थाः अप्रतकर्ष्यबलाढ्याश्च भवन्ति। करिणीनां गर्भप्रदानशीलाश्च। अपि चायमेव समयः गजानां यौवनकालः। एवं विंशतिवत्सरकालमारभ्य त्रिंशद्वर्षकालावधि मध्यमं वयः त्रिंशद्वर्षकालमारभ्या-चत्वारिंशद्वर्षकालम् उत्तमं वयः सर्वेषामपि गजानाम्। अतः परं वृद्धदशैव गजानां परिहरया भवेदिति। अत एव महीपालैः हस्तिपालैश्च गजानां तत्तद्वयःक्रमानुगुणं कार्याणि शिक्षाक्रमश्च आकलनीय इति क्रमः। स्पष्टमन्यत्।

३६-४१ परमकारुणिकः भगवान् नारदः एतावता प्रबन्धेन सर्वेषामपि गजानामंशलक्षणादिकं गजग्रहणप्रकारं तदानयनक्रमं गजशालानिर्माणक्रमादिकमप्युप-दिश्याधुना विशेषतः फलप्रदं गजशिक्षाक्रममुपदिशति—अतः परमित्यादिना। गजशिक्षाप्रयोगादिनैव भूपालादीनां परमा राष्ट्रवृद्धिरुपजायते। भूपालेतरेषां च बहूनि फलान्युद्भवन्ति। अत एव गजानां जातिभेदं कुलभेदं वयःक्रमं च सम्यक् ज्ञात्वा भूपालैर्गजपालैश्च समुचितसमये गजशिक्षा समाकलनीयेत्युपदेशः। केचित् गजाः स्वभावोज्ज्वलया निजधिया तृतीये वयसि शिक्षाक्रमधारिणो दृश्यन्ते। परे तु चतुर्थे वयसि। अन्ये तु पञ्चम इत्यादिको भेदः। स च परिचयादिना सूक्ष्मं ज्ञेय इत्युपदेशः। अकालप्रयुक्ता गजशिक्षा तु फलाय न भवेदिति। अत एव स्ववशवर्तिनः उत्तमान् गजान् सर्वशः एकस्मिन् चत्वरतले मेळयित्वा तेषु गजेषु वक्ष्यमाणप्रकारं गजशिक्षाक्रमं प्रयोजयेदिति॥

४२-४६ विस्तरेण गजशिक्षाक्रममुपदेष्टुमादौ तादृशशिक्षार्हगजलक्षणं प्रथमतो निरूपयति—उत्तमैरित्यादिना। पूर्वप्रतिपादिताः द्वितीयपटलारम्भभागे निर्दिष्टलक्षणाः

इन्द्रांशभासुरा गजा वा अग्न्यंशभासुरगजाः धर्मांशभासुरगजाः वरुणांशभासुरगजाः कुबेरांशलसिताः गजाः शंकरांशलसिता गजाः पवमानांशभासुरा गजाः गन्धर्वांशगजाः किन्नरांशलसिता गजाः यक्षांशलसिताः गजाः विष्ण्वंशलसिता गजाः ब्रह्मांशलसिता गजाः चन्द्रांशभासुरा गजाः मुन्यंशभासुरा गजाः नृपांशभासुरा गजाः मानुषांशभासुरा गजा वा शिक्षार्हा भासन्ते। एवमत्रोक्तैः षोडशविधैरुत्तमैः देवांशैः लसिता एते वारणास्सर्वेऽपि गजशिक्षायां प्रथमां कक्ष्यामारोहन्ति। यथाप्रातिक्रममेतेषु गजेषु शिक्षाक्रमाकलनीया। किंच क्षितिमण्डले नानारण्यतलेषु परिदृश्यमानगजबृन्देषु केचित् गजाः एतादृशदेवांश-लक्षणैर्विहीना अपि सौवीरकोसलविन्ध्याद्युत्तमगजकुले जनिताः सन्ततं प्रशान्तचेतसः शिक्षाकालात् पूर्वमेव संत्यक्तक्रोधादिदुर्गुणाः मानुषावासकांक्षिणः सुलभसाध्याश्च दृश्यन्ते। तेष्वप्युत्तमा गजाः शिक्षासु विविधासु प्रथमकक्ष्यायां विलसन्ति। एवमुत्तम-शिक्षार्हाणां गजानामुत्तमानां परिज्ञानमाकलनीयम्। शिक्षायां मध्यमगजाः कीदृशा इत्याकांक्षायामाह—षड्विधैर्मध्यमैरंशैरित्यादिना। पूर्वनिर्दिष्टरीत्या पित्रंशभासुरा गजा वा विहगांशगजाः मत्स्यांशगजाः लतांशगजाः कुसुमांशगजाः धेन्वंशगजाः वा यदि स्वगज-शालायां जनिताश्चेत् तदा एतादृशगजानपि युक्ता गजपालादयः मृदुवाक्यप्रयोगादिभि-श्शान्तयित्वा तज्जात्यनुगुणं समुचितशिक्षां प्रयोजयेत्। एतादृशगजास्सर्वेऽपि मध्यमा एव। शिक्षाकालादौ च मध्यमायामेव कक्ष्यायां गण्यन्ते, मृगयायुद्धदुर्गद्वाररक्षणादिषु उत्तमकार्येषु एतादृशा मध्यमा गजा न नियोक्तव्या इति व्यवस्था। किंच एतेषु मध्यमगजेषु केचित् गजाः शिक्षाकाले प्रज्ञास्खालित्यं पादविन्यासादिस्खालित्यं मनश्चाञ्चल्यादिकं भजन्ते। तथापि गजपालकैस्तत्क्षणमेव शिक्षितास्सन्तः सृणिपाशांकुशादिदर्शनभीतास्सन्तः समीचीनबुद्धिविलासमवाप्य स्वस्वकार्यादिनिरताश्च भवन्ति। अपि च उत्तमगजाः एते सर्वेऽपि मानुषवन्मनोहरभाषणशक्तिहीना अपि मानुषाज्ञावशवर्तिनस्सन्तः यथाशक्ति मानुषाणां बहूनि फलान्युत्पादयन्ति स्वकीयैर्विविधैः कार्यैरिति। अत एव महीपालाः आधोरणादयश्च तेषां तेषां गजानां कुलभेदं द्वितीयतृतीयादिवयःकालं गुणभेदं बुद्धिपाटवादिकं बुद्धिविलाससमयादिकं च ज्ञात्वा चिरपरिचयादिना सम्यगवधार्य गजशिक्षां प्रयोजयेयुरिति। एवमाचरणमेव उत्तमफलान्युत्पादयतीति।

४८-५६ नानाकुलजनितेषु गजबृन्देषु के वा गजाः शिक्षानर्हाः कथमेते परिज्ञेया इत्याकांक्षायामाह—क्रूरकार्यरता इत्यादिना। शिक्षासमये केचित् नीचात्मानो गजाः स्वकीयमौर्ख्यादिदुर्गुणप्रदर्शनपरास्सन्तः अतीव क्रुद्धास्सन्तः तानेव यन्तॄन् हन्तुं यतन्ते। परे गजास्तु निजमस्तकादिभागेषु हस्तिपालप्रेरितांकुशप्रयोगादिकं न

सहन्ते। एतादृशगजाश्च शिक्षासु वर्ज्या एव निश्चिताः। एवमपरे तु केचित् गजाः सन्ततममितकोपाः सान्त्ववाक्यविमुखाश्च भवन्ति। एवं ये ये गजाः बुद्धिविकास-हीनाः हठात्कारकार्यनिरताश्च विलोक्यन्ते ते च द्विपाः शिक्षादौ वर्ज्या एव। किंच नितरां स्वल्पबुद्धिभाजः गजाः बालव्याधिग्रस्ताः गजाः श्रमसाध्यकार्यप्रदर्शनसमये भीतिहताः धैर्यहीनाः गजाः नितरां कृशदेहा गजाः वामनाः गजाः तदपेक्षया वामना गजाः स्वकीयमूत्रपानादिनीचकार्यरताः गजाः नरगंधासहिष्णवो गजाः मानुषाज्ञाचरणे बद्धवैराः गजान्तरं प्रति च ये ये गजाः भर्त्सनताडनहिंसाद्याचरणपराश्च दृश्यन्ते। अपि च ये ये गजाः राक्षसांशाः क्रूरा ये गजाः असुरांशाः ये च पिशाचांशा ये वा सिंहांशाः शार्दूलांशाः वानरांशा वा विलोक्यन्ते ते च सर्वे शिक्षासु दूरतस्त्याज्या एव। भूपालगजपालादीनां आज्ञाचरणविषये गर्वदर्पमोहादिभिरवज्ञाकारिणश्च गजाः शिक्षा-नर्हा एव। एवं कपटस्वभावाः गजाः कृतघ्ना गजाः पदे पदे तन्द्रालस्यादिप्रदर्शकाः नीलवर्णदन्ताः गजाः भग्नदंता गजाः भग्नपादनखाः ह्रस्वकराः क्षुद्रवालाः रक्तवर्णनखना गजाश्च शिक्षासमये दूरतस्त्याज्या एव। न तैः किमपि फलमिति भावः। अपि च ये ये गजाः कामवेगसमाक्रान्तमानसा ये गजाः काकाक्षा वानराक्षा वा ये च गजाः भल्लूकवत् निबिडरोमावलीव्याप्तशरीराः क्षुद्रमस्तकाः शरीरप्रमाणाननुगुणक्षुद्राकारमस्तकसहिता गजाः भयंकररींकारकारिणो गजाः कारणं विनैव हठात् झटिति मानुषाणां धेनुवत्सहरिणादीनां भयप्रदानशीलाश्च गजाः अधमा एव। किंच एवंरीत्या अविनया गजाः बहुभिरनर्थकारिभिरन्यैः दुर्गुणैरुपेता गजाश्च दूरतो वर्जनीयाः। अत एव बुद्धिमन्तः गजपालवीरभटादयः गजैस्साकं आबाल्यपरिचयादिना तेषां सुगुणान् दुर्गुणांश्च ज्ञात्वा दुश्शीलान् गजानपसार्य उत्तमगजेष्वेव शिक्षा संयोज्या। अपि च शिक्षासमये गजानामाधोरणानां हस्तिभटानां च यथा वा अपायो न स्यात्, अपभ्रंशादिकं च न भवेत् गजानां गजपालादीनां च मनस्तुष्टिः सुलभशिक्षा च यथा भवेत् तया रीत्या गजशिक्षा समाकलनीया। तदर्थं दुष्टान् गजान् दूरतो वर्जयित्वा सुशीलानेव गजान् गजशिक्षायै स्वीकुर्युरिति मुनेरुपदेशक्रमः।

५७-५९. अथ गजशिक्षाप्रयोगक्रमं संग्रहेण वक्तुमादौ तादृशशिक्षया केषां कानि फलानि भवन्तीत्याकांक्षायामाह—शिक्षा सप्तविधेत्यादिना। महर्षिणा नारदेन शिक्षा तावत् सप्तविधा निश्चिता। अनया सप्तविधशिक्षयैव सर्वेषामपि गजानां भूपाला-दीनामन्येषां च सकलकार्यसिद्धिरपि संजायते। शिक्षैव गजानां नानाविधसौख्यवर्धनी। बलसंतोषादिहितकारिणी च परिदृश्यते। मानुषवशमासाद्य शिक्षाभाजामेव गजानां

जन्म सफलम्। शिक्षादिकं विना वनेषु स्वेच्छाविहारशीला गजास्सर्वेऽपि मूढात्मानः व्यर्थजन्मानः परोपकाररहिताः देवताप्रसादभूपालसंमाननादिकमप्राप्यैव व्यर्थकालहरणशीला भवन्ति। अत एव सर्वविधश्रेयस्करी सर्वदेशप्रचारणा गजविद्या सर्वैरपि प्राणिहितादये आदरणीयेति तत्फलकथनादिः ॥

६०-७५ शिक्षा सप्तविधा प्रोक्तेत्यादिकं मनसि निधाय भगवान् नारदो मुनिः तत्र प्राथमिकीम् आरम्भशिक्षामुपदिशति—गजानामित्यादिना। सूक्ष्मधिया भासुराः हस्तिपालाः गजानां बुद्धिचातुर्यं स्वस्वजातिभेदेन संगतं सौशील्यादिगुणान् गजकुलक्रमं गजजननदेशक्रमं चादौ ज्ञात्वा तदनुगुणशिक्षाप्रेरणाय यतेयुरिति। अत एव तादृशज्ञानं तावत् गजानां जन्मकालमारभ्य तैस्साकमनवरतवासादिनैव संपादनीयं भवति। एवंरीत्या गजबुद्धिचातुर्यसौशील्यादिज्ञानप्राप्त्यनन्तरं शुभे दिने विरचितदेवतोपासनाः गजपालादयः गजशालायाः पुरतःस्थलं वा क्वचिदुद्यानमध्यभूभागमतिविशालं निम्नोन्नतत्वादिदोषरहितं विस्तारितमृदुसैकतं नीत्वा ततः एकद्वित्र्यादिक्रमेण पङ्क्तिरचनामाकलय्य एकैकस्यापि गजशावकस्य पुरतःस्थले पार्श्वयोरुभयोरपि च त्रयः हस्तिपालकाः स्थितिमवाप्य दिक्पालान् स्वस्वमनसि ध्यात्वा शुभसिद्धये तांश्च संप्रार्थ्य तदनु मधुराह्वानेन सान्त्ववाक्यप्रयोगेन च तान् गजशावकान् सुमनस्कान् अचञ्चलांश्च कृत्वा प्रथमदिवसद्वितीयदिवसादिक्रमेण आरंभशिक्षां तेषु प्रयुञ्ज्युरिति तद्व्यवस्था बोध्या। अत एव एतादृशी प्रारम्भशिक्षा कीदृशीति चेत् तदाह—सृणेस्संधारणमित्यादिना। काम्भोजकाश्मीरादिषु देशेषु सर्वेष्वपि नियमेन गजशावकानां तृतीये वत्सरे प्राप्ते तदा तदा आरम्भशिक्षा उपदेश्या। एकस्मिन्नेव कर्णे वा कर्णयोरुभयोर्वा अंकुशधारणं जनान्तिकं प्रति निर्भीकत्वं गजपालानां नानाविधाज्ञापरिपालनं तदनुगुणकार्याचरणम् अतिवेगपदविन्यासाभ्यासधोरणीमन्दगत्यभ्यासक्रमः सान्त्ववाक्यादिप्रयोगे झटिति प्रसन्नत्वं विविधेषु कार्यसमयेषु एकाग्रचित्तत्वं शयनक्रमः उत्थानक्रमः निषण्णक्रमः शुण्डायाः तदग्रभागस्य च संकोचप्रसारादिकलनं निर्भयं सलिलमज्जनाभ्यासादिः कार्यसमये श्रमसहिष्णुत्वं स्वाहारस्वीकरणे यथाक्रमवर्तित्वमेतानि सर्वाण्यपि आरम्भशिक्षा इति कीर्त्यते। एतादृशी आरंभविद्या मुहूर्तक्रमदिनक्रमादिना उपदेश्या। अपि च शिक्षाकाले यदि मोहमनश्चाञ्चल्यादिना गजशावकानां स्खालित्ये सति तदा ते तदनुगुणं स्वल्पदण्डनार्हा भवन्ति। तादृशगजशावकदण्डादिस्तु विविधस्वरूपो भवति। गजशावकानां वाचा संतर्जनमेव फलप्रदं भवति। अंकुशप्रदर्शनेन तत्प्रहरणादिना च केचित् गजशावकाः साध्या भवन्ति। प्रेरणया तत्तद्देशभाषया संकेतकलनैरन्यैरपि विविधैरुपायैः

शिक्षाग्रहणतत्परा भवन्तीति क्रमः। किञ्च गजशावकाः सर्वेऽपि मानवशिशव इव गजपालकादिभिः ताडनलालनतर्जनाद्यैस्संरक्षणीयाः। एवमाचरणमेव आरम्भशिक्षेत्युच्यते। शेषं स्पष्टार्थकम् ॥

७६-८३ अथ क्रमप्राप्तस्य द्वितीयस्य खेलनशिक्षाक्रमस्य लक्षणमाह-गजानामिहेत्यादिना। सर्वेषामपि गजशिशूनां चतुर्थसंवत्सरे संप्राप्ते सति तदा बुद्धियुक्त्यादि-शालिनो गजपालाः उत्तमेषु गजेषु खेलनशिक्षां प्रयुञ्जेयुरिति क्रमः। अनया खेलन-शिक्षया गजशावकानां बलवृद्धिः सन्धिबन्धसौष्ठवादिकं मनोविलासादिश्चोद्भवति। तादृश-खेलनं पश्यतां नराणामपि नयनानन्दप्राप्त्यादिरिति। अतस्तादृशगजखेलनशिक्षा तावत् प्रतिदेशं भिन्नस्वरूपा तत्तद्देशजनवाञ्छानुगुणप्रचारा च भवति। अतस्सा युक्त्यैव ज्ञेया। तथापि प्रसिद्धस्वरूपं खेलनशिक्षायाः कीर्त्यत इति मुनेराशयः। यथा—पूर्वोक्तशैल्या गजशालायाः पुरःप्रदेशे उद्यानस्य मध्यभूभागे वा समुचितसैकतादिरचने पंचषगजान् अथवा दशाधिकगजान् तदनुगुणपरिचारकजनमण्डितपार्श्वभागान् पङ्क्तिशो मेळयित्वा वर्तुलाकारं पंचाशद्दण्डायामप्रमाणं स्थलं वर्णादियोजननेनांकयित्वा तत्र रेखाभागे गजशिशूनां चतुर्थे वयसि खेलनशिक्षा समाकलनीया। हस्तिपकाद्यभिमुखं स्वमुखं कृत्वा तादृशमण्डलाकाररेखामार्गेणैव पदविन्यासः खेलनशिक्षायामेकविधः। अपि च एवमेव गजशावकानां पुरतःस्थले एकपक्षेण गमनं द्वितीयपक्षेणागमं पृष्ठभागेन प्रतिनिवर्तनं मण्डलस्य मध्यभागरेखायां प्राचीदिशः प्रतीचीगमनं दक्षिणस्याश्चोत्तरदिग्गमनमिति तद्भेदः। अपि चाग्नेयादिषु दिक्कोणभागेषु अर्धमुहूर्तकालं निष्पन्दनस्थितिः। तत्र गमनागमनक्रिया ललितखेलनं च विविधस्वरूपं भवति। पुरतःस्थले स्थितानां महीपालादीनामन्येषामपि पुंसां शुण्डादण्डप्रसारादिना मधुररींकारध्वनिना च नमस्काराचरणं मुहूर्तकालं शरीरनिश्चलत्वं बहुविधपादविन्यासक्रमः क्रमगमनं व्युत्क्रमगमनं मन्दगतिद्रुतगति-मिळितगमनं सव्यापसव्ययोः शुण्डाप्रसरणादिकम् अतिधावनगतिभाजामन्येषां सवयस्कानां दूरतो दर्शनं तन्मेळने स्वस्याप्यभिरुचिस्वीकरणमित्यादीनि बहुविधानि गजखेलनानि लोकप्रसिद्धानि सार्वदेशिकानीति मुनेरुपदेशक्रमः। तस्मात् भूपालादयः एतादृशीं सार्वदेशिकीं खेलनशिक्षाम् उत्तमगजेषु यथायुक्ति यथाकालं प्रयुञ्जेयुरिति।

८४-९२ पंचममिति। पूर्वोक्तप्रकारेण बुद्धिमन्तो गजपालकाः गजशावकानां आरम्भशिक्षाभ्यासं खेलनशिक्षाभ्यासं च यथाक्रमं कल्पयित्वा तदनु पंचमे वयसि संप्राप्ते सति तदा तेषु शावकेषु धावनशिक्षां च प्रयुंजेयुरिति तत्क्रमः। अपि च इयं तु धावनशिक्षा सर्वेष्वपि गजशावकेष्ववश्यं प्रयोज्येति न नियमः। परन्तु भूपालादीनाम् इच्छानुगुणामेव

कलनीयमिति। तथापि एतया धावनशिक्षया गजशावकानां मनोदार्ढ्यप्राप्तिः क्लेशसहिष्णुता शरीरपुष्टिप्राप्त्यादिकश्च संभवत्येवेति मतिः। पणकार्यार्थं पणविजयकार्यार्थं वनभूमिप्रमुखेषु तलेषु मृगयाद्याचरणार्थं च धावनमिदं प्रशस्तमादिष्टम्। एतादृशधावनमपि तत्र तत्र देशभेदेन नानास्वरूपमेव परिदृश्यते। परम्परागतक्रममेवानुसृत्य धावनशिक्षयमपि गजेषूत्तमेषु नितरां बलाढ्येष्वेव युक्तया क्रमेण प्रयोज्येति व्यवस्था। बलाढ्यानामेव गजानामियं धावनशिक्षा, न तु स्वल्पबलानाम् अल्पबलानां गजानामिति। तादृशदुर्बला गजाः एतस्यां धावनधाट्यां मध्ये पतिता भीताः पराजिताः भग्नोरस्काः मनःकम्पनादिना भीताश्च भवन्तीति। अतः बलाढ्येष्वेव गजेषु धावनशिक्षा कल्पनीयेति व्यवस्था। किंच नगरस्यादूरे बहिःप्रदेशे समतले मृदुसैकतादिपरिपूरिते भूभागे सहस्रदण्डपरिमितां भूमिमथवा केषुचित् देशेषु द्विसहस्रदण्डपरिमितां भुवं स्वीकृत्य तादृशभूस्थलस्य अष्टास्वपि दिक्षु गैरिकादिभिः वर्णैः रेखालक्ष्म निर्दिशेत्। तादृशरेखाप्रान्तावधिकमेव गजधाटी कल्पनीयेति तत्क्रमः। अतः तादृशभूतलस्य पुरतः सव्यापसव्यभागयोश्च महाव्यजनस्थापनमथवा महाचामरवीजनस्थलं शृंखलाबन्धनं वा क्षुद्रभित्त्याः निर्माणं वा गजवेगनिरोधार्थमाकलयेदिति। अन्यथा महावेगमहाधाटीभाजां गजानां सीमातिलंघनमपि क्वचित् भवेदिति। अतस्तादृशसीमातिलंघननिरोधाय पूर्वोक्तव्यजनचामरशृंखलादिनिरोधलक्ष्माणि विविधानि यथादेशाचारं स्थापयित्वा हस्तिपालाः दिनक्रममासक्रमेण धावनधाटिषु संप्रापितकौशलान् गजान् प्रेरयेयुः। धावनं वेगगमनम्; अतिवेगगमनं गजधाटीति प्रसिद्धम्। अतः धावनशिक्षा धाटीशिक्षा च प्रातःकाल एव गजानामाकलनीया। तेनैव तेषां बलपुष्टिमनस्तुष्ट्यादिप्राप्तिः। अपि च एकधाटी तावत् मनोदार्ढ्यमवलम्ब्य एकस्मात् स्थलात् स्थलान्तरं प्रति एकदा अविच्छिन्नगमनम्। द्विधाटी तु एकस्मात् स्थलात् स्थलान्तरं प्रति गमनं, तत्क्षणादेव तस्मात् स्थलात् अचिरेण पुनः प्रतिनिवर्तनमिति च तद्भेदः। तथा च वेगगमनं तत्प्रतिनिवर्तनं चेति। पणविजये कार्ये गजधावनधाटी दिनक्रमेण मासक्रमेण बलाढ्येषु गजशावकेषु युक्त्या नियोक्तव्येत्युपदेशः। भटानामायुधाभ्यासशैलीव गजपोतकानां धावनशैली च अवश्यमभ्यसितव्येति। एवं एकधाटीशिक्षा द्विधाटीशिक्षा च कालक्रमेण संयोजनीया। अनयैव रीत्या त्रुटितवेगधाटी च केषुचित् उत्तमगजेषु नियोज्या। त्रुटितवेगगतिस्तावत् वेगतो गमनम् उल्लासलीलागमनेन आगमनमिति। अथवा उल्लासलीलां स्वीकृत्य गमनं निवर्तनसमये वेगेन गमनमिति च तद्भेदः। किंच गैरिकधातुचिह्नितरेखासमीपतल एव धावनम्; एवं प्राचीदिशः प्रतीचीदिग्गमनम्, अथवा उत्तरदिगन्तात्

दक्षिणदिग्गमनमिति, क्वचित् प्रथममण्डलभ्रमणं द्वितीयमण्डलभ्रमणं तृतीयमंडलभ्रमण-मित्यादिक्रमपि क्षणधावनघाटीति निगद्यते। एतादृशगतिघाटी च क्रमतः बलाढ्येषु संयोज्या भवति। अपि च अनयैव शैल्या सव्यभागे मन्दगतिस्वीकरणमपसव्यभागे द्रुतगतिस्वीकरणमथवा सव्यभागे द्रुतगतिस्वीकरणमपसव्यभागे मन्दगतिस्वीकरणं च क्षणघाटीति निगद्यते। एवं प्लुतवेगगमनं मन्दवेगवेगमन्दमिलितगमनं शुण्डासंकोच-पूर्वकधावनं च उत्तमगजेषु निक्षिप्तव्यम्। किंच एतादृशघाटीक्रमस्तावत् प्रतिदेशं भिन्नरीतिका एव परिदृश्यते। तस्मात् स्वस्वदेशाचारक्रमेण गजपणे मृगयादिकार्ये च धावनशिक्षा बहुफलप्रदा निश्चिता गजानामपि मनोदार्ढ्यादिविविधसौख्यप्रदात्री च। किं चास्यां धावनशिक्षायां गजानां स्खलितं यथा न भवेत् तथा गजा हस्तिपालैः संरक्षणीया इति चोपदेशः। शेषं स्पष्टम्॥

(इतः परं मातृका नोपलभ्यते)